पाणिनीयप्रवेशविज्ञानम्

यथा देवदत्तस्य पुत्रो नास्ति, स कमपि बालकं पुत्र इत्यङ्गीकरोति। इदानीं स बालको देवदत्तस्य पुत्र एव। इदानीं स एव दत्तकपुत्रो देवदत्तस्य दायभागस्य, और्ध्वदेहिककर्मणां वाऽधिकारी वर्तते। न भवति कश्चन भेद औरसदत्तकपुत्रयोर्मध्ये। तथैव व्याकरणशास्त्रेऽनेकत्र एकस्मिन्नन्यस्य धर्म आरोप्यते। यथा – श्यन्, श्नु, श, श्नम्, श्ना, शतृ, शानच्, इत्यते प्रत्यया न सन्ति ङित:, किन्त्वत्र 'सार्वधातुकमपित्' इत्यनेन ङित्त्वधर्म आरोप्यते। सन्प्रत्यय: कित् नास्ति, किन्तु 'इको झल्' इत्यनेन क्वचित् तत्र कित्त्वधर्म आरोप्यते। क्त्वाप्रत्यय: किदस्ति, किन्तु 'न क्त्वा सेट्' इत्यनेन तत्र अकित्त्वधर्म आरोप्यते। अयमतस्मिंस्तद्धर्मारोप एव पाणिनीयव्याकरणेऽतिदेश इत्युच्यते।

अतस्मिंस्तद्धर्मारोपोऽतिदेशो यद्यपि निमित्त–व्यपदेश–तादात्म्य–शास्त्र–कार्य–रूप–भेदेन षड्विधो भवति, किन्तु सर्वत्रातिदेशस्य तात्पर्यं कार्य एव भवति, अत: षट्स्वतिदेशेषु कार्यातिदेश एव प्राधान्यं भजते। 'कु+ता' इत्यत्र 'गाङ्कुटादिभ्योञ्णिऽन्ङित्' इति ङित्त्वातिदेशे सति, ङिन्निमित्तकं शास्त्रं 'क्ङिति च' इति तत्रोपस्थितं भवति। 'दम्भ्+श्नु' इत्यत्र 'सार्वधातुकमपित्' इति ङित्त्वातिदेशे सति, ङिन्निमित्तकं शास्त्रं 'अनिदितां हल उपधाया: क्ङिति' इति तत्रोपस्थितं भवति। 'दिव्+इट्+क्त्वा' इत्यत्र 'न क्त्वा सेट्' इति अकित्त्वातिदेशे सति, अकिन्निमित्तकं शास्त्रं 'पुगन्तलघूपधस्य च' इति तत्रोपस्थितं भवति। अत: शास्त्रातिदेशोऽपि कार्यातिदेशादभिन्नरूपो भवति।

अस्यातिदेशस्य प्रयोजनद्वयं भवति।

आदेशलक्षणप्रतिषेधार्थम् – आदेशे सति यल्लक्षणं शास्त्रं प्राप्नोति, तन्न भवत्वित्येतदर्थम्। यथा – हन्+हि, इत्यत्र हन्तेर्ज: इति जादेशे कृते 'अतो हे:' इति हिलुक् प्राप्नोति, अतिदेशेन पुनर्न भवति।

उत्सर्गलक्षणभावार्थम् – उत्सर्ग: स्थानी। तस्मिन् सति यत्कार्यं प्राप्नोति, तदादेशे सत्यपि प्राप्नोत्वित्येतदर्थम्। एधि, शाधि, इत्यत्र एत्वशाभावयो: कृतयो: 'हुझल्भ्यो हेर्धि:' इति झल्लक्षणं धित्वं न प्राप्नोति, अतिदेशेन तद् भवति।

इदानीं शास्त्रप्रक्रियायां प्रवेशाय सामान्यातिदेशा उच्यन्ते। विशेषातिदेशास्तु तेषु तेषु प्रकरणेषु वक्ष्यन्ते।

स्थानिवदादेशोऽनल्विधौ (पा. सू. १.१.५६)

आदेश: स्थानिवद् भवति, न तु स्थान्यलाश्रयविधौ।

स्थानिना तुल्यं वर्तत इति स्थानिवत्। 'तेन तुल्यं क्रिया चेद्वति'रिति वतिप्रत्यय:। स्थानं प्रसङ्ग:। यस्य स्थानेऽन्यद्विधीयते, तत् स्थानि। येन विधीयमानेनान्यद् निवर्तते,

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

स आदेशः। स्थानी पृथग्भवति, आदेशश्च पृथग्भवति, अतः स्थान्यादेशयोः पृथक्त्वात् स्वरूपभेदात् स्थानिप्रयुक्तकार्याणामादेशेऽप्रवृत्तावतिदेशोऽयमारभ्यते। यथा गुरुवद् गुरुपुत्रे इति। लोके गुरोः स्थाने शिष्यः याज्यकुलानि गत्वाग्रासनादीनि लभते, यथा च वेदे दर्भाणां स्थाने शरैः प्रस्तरितव्यम्, इति दर्शनात् दर्भाणां स्थाने प्रस्तीर्णाः शराः तत्स्थानापन्नत्वात् तद्धर्मं लभन्ते, तथैव शास्त्रे स्थानिनः स्थान आदेशोऽपि स्थानापत्त्या तद्धर्मलाभं करोतु, किमनेन सूत्रेणेति। उच्यते –

सामान्यातिदेशे विशेषानतिदेशो भवति। तद्यथा – ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम्, अनेन सामान्यं यद् ब्राह्मणकार्यं भवति, तत् क्षत्रियेऽतिदिश्यते। यद्विविशिष्टं माठरे कौण्डिन्ये वा भवति, न तदतिदिश्यते। एवं लोके शिष्यो याज्यकुलानि गत्वा गुरुवदग्रासनादीनि लभते, किन्तु गुरोः स्वरूपाश्रितानि पादसंवाहनादीनि न लभते।

शास्त्रे च 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति वचनात् शब्दस्य स्वं रूपमेव बोध्यं भवति। अतो 'आङो यमहनः' इत्यत्र 'यम्' इत्यस्माद् विहितमात्मनेपदं, तदादेशाद् 'यच्छ' इत्यस्मान्न प्राप्नोति। 'हन्' इत्यस्माद् विहितमात्मनेपदं, तदादेशाद् 'वध' इत्यस्मान्न प्राप्नोति। इष्यते चोभयत्रापि। अतः स्थान्यादेशयोर्भिन्नरूपत्वात्,'स्वं रूप'मित्युक्तेश्च स्थानिस्वरूपाश्रितं यत् कार्यमादेशे न प्राप्नोति, तदपि स्थानिस्वरूपाश्रितं कार्यमादेशे प्राप्नोत्वित्यतिदेशोऽयमारब्धव्यः।

अस्य सूत्रार्थस्य द्वौ भागौ स्तः।

१. आदेशः स्थानिवद् भवति, इति विध्यंशः।

२. अनल्विधौ, इति निषेधांशः।

आदेशः स्थानिवद् भवतीत्युच्यते –

१. धात्वादेशो धातुवद् भवति। 'अस भुवि' इत्यस्य धातुपाठे पठितत्वाद् धातुसंज्ञास्ति। आर्धधातुकविषये 'अस्तेर्भूः'(२.४.५२) इत्यनेन तस्य 'भू' इत्यादेशो भवति। अस्यादेशस्यापि स्थानिवत्त्वात् धातुसंज्ञा भवति। तेन 'धातोः' (३.१.९१) इत्यधिकृत्य विहितास्तव्यदादयः प्रत्यया आदेशादपि भवन्ति। भविता। भवितुम्। भवितव्यम्। एवं 'ब्रुवो वचिः' (२.४.५३)। चक्षिङः ख्याञ् (२.४.५४), इत्यादिष्वपि ज्ञेयम्। वक्ता। वक्तुम्। वक्तव्यम्। ख्याता। ख्यातुम्। ख्यातव्यम्।

२. अङ्गादेशोऽङ्गवद् भवति।केन, काभ्याम्, कैः।'किमः कः' (७.२.१०३) इति कादेशे कृतेऽङ्गाश्रया इनदीर्घत्वैस्भावा भवन्ति। 'किम्' इत्यस्याङ्गत्वं तदादेशे 'क' इत्यत्रातिदिश्यते।

३. कृदादेशः कृद्वद् भवति। प्रकृत्य। प्रहृत्य। 'क्त्वा' इत्यस्य कृत्त्वं तदादेशे ल्यप्यतिदिश्यते। तेन 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१) इति तुग् भवति।

४. तद्धितादेशस्तद्धितवद् भवति। दाधिकम्। अद्यतनम्। 'ठक्' इत्यस्य

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

तद्धितत्वं तदादेशे 'इक' इत्यत्रातिदिश्यते। तेन 'कृत्तद्धितसमासाश्च' (१.२.४६) इति प्रातिपदिकसंज्ञा भवति।

५. अव्ययादेशोऽव्ययवद् भवति। 'क्त्वातोसुन्कसुनः' इति क्त्वाप्रत्ययस्या-व्ययसंज्ञास्ति। तस्याव्ययत्वं तदादेशे ल्यप्यतिदिश्यते। तेन 'अव्ययादाप्सुपः'(२.४.८२) इति सुब्लुग् भवति। प्रस्तुत्य। उपहृत्य। उपस्तुत्य। विजित्य।

६. सुबादेशः सुब्वद् भवति। वृक्षाय। प्लक्षाय। 'ङेर्यः' इति ङेप्रत्ययस्य स्थाने यकारादेशे ङेप्रत्ययस्य सुप्त्वं यकारादेशेऽतिदिश्यते। तेन 'सुपि च' (७.३.१०२) इति दीर्घत्वं भवति।

७. तिङादेशस्तिङ्वद् भवति। अकुरुताम्। अकुरुतम्। 'तस्थस्थमिपां तान्तन्तामः' इत्येतेन तस्थस्थमिपां स्थाने तान्तन्ताम इत्येत आदेशा भवन्ति। स्थानिनां तिङ्त्वमादेशेष्वतिदिश्यते। तेन 'सुप्तिङन्तं पदम्' (१.४. १४) इति पदसंज्ञा भवति।

८. पदादेशः पदवद् भवति। ग्रामो वः स्वम्। जनपदो नः स्वम्। युष्माकम्, अस्माकम्, इति स्थानिनौ। वस्-नस् इत्यादेशौ। स्थानिनः पदत्वमादेशेऽतिदिश्यते। तेन 'पदस्य' (८.१.१६) इति रुत्वं भवति। एतेऽष्टावादेशा काशिकानुसारेणोक्ताः।

यत्तु प्रौढमनोरमायामुच्यते – काशिकायां यद् धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशा इति परिगणनं कृतं, तत् परिगणनमात्रमस्ति, उदाहरणमात्रं वा ? नाद्यः। सिच्क्सचङ्ङादीनां, श्वादेशस्य शानचश्चासंग्रहापत्तेः। नान्त्यः। अव्ययस्य समावेशोऽङ्गे, पदे वा कर्तुं शक्यते, तर्हि अव्ययग्रहणस्य पृथग्ग्रहणवैयर्थ्यात्।

अत्रोच्यते – प्रत्ययपदसंनिवेशेनैव सिच्क्सचङ्ङादीनां, श्वादेशस्य शानचश्च संग्रहः कर्तुं शक्यते, अत इदं परिगणनमेव। कृत्तद्धितसुप्तिङां यत् पृथगुपादानं कृतं, तत्तु गोबलीवर्दन्यायेन, ब्राह्मणवसिष्ठन्यायेन वा।

यद्यपि अव्ययस्य समावेशोऽङ्गे, पदे वा कर्तुं शक्यते, तथापि यदव्ययग्रहणं कृतं तदपि गोबलीवर्दन्यायेन, ब्राह्मणवसिष्ठन्यायेन वा।

यत्तु प्रौढमनोरमायामुच्यते – प्रस्तुत्येति वृत्तिकारोक्तं तदुदाहरणमपि मन्दम्, इत्यप्यसमीचीनमेव, यतः सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः, एकदेशविकारे हि नित्यत्वं नोपपद्यते, इति भाष्यवचनादत्र प्रस्तुत्वा इत्यस्य स्थाने प्रस्तुत्य इत्यादेशो भवति, न तु क्त्वाप्रत्ययस्य स्थाने ल्यप् इत्यादेशः। पदमञ्जरीकारोऽप्येवमभिप्रायः– क्त्वामात्रस्य ल्यबादेशः, क्त्वान्तस्याव्ययसंज्ञा। स कथमव्ययादेशः, तस्मात् क्त्वाग्रहणेन ल्यपो ग्रहणात् तदन्तस्यापि संज्ञा भवतीत्येवम्परमेतत्।

वत्करणं किम्? स्थानी आदेशस्य संज्ञा मा विज्ञायीति, स्वाश्रयमपि यथा स्यात्। 'आङो यमहनः (१.३.२८)' इत्यनेन आङ्पूर्वकाद् 'यम्' धातोर्विहितमात्मनेपदं यम्धातोरपि

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

स्यात्, तदादेशादपि स्याद् – आयंस्यते। आयच्छते। आङ्पूर्वकाद् 'हन्' धातोर्विहितमात्मनेपदं हन्धातोरपि स्यात्, तदादेशादपि स्याद् – आहते। आहत, आवधिष्ट।

आदेशग्रहणं किम् ? स्थानिवदित्येतावतैव तल्लाभादिति चेदत्राहुः – द्विविध आदेशः। प्रत्यक्षः – अस्तेर्भूः, चक्षिङः ख्याञ्, ब्रुवो वचिः, इत्यादयः। आनुमानिकः –तेस्तुः। अत्र 'एरुः', इत्यस्य इकारेण इकारान्तः स्थान्यनुमीयते। उकारेण चोकारान्त आदेशः। असत्यादेशग्रहणे प्रत्यक्षस्यैवादेशस्य ग्रहणं स्यात्, नानुमानिकस्य। आदेशग्रहणसामर्थ्यात्तूभयपरिग्रहः। तेन पचतु इत्यादेस्तिङन्तत्वात् पदसंज्ञा सिध्यति। ननु एकदेशविकृतमनन्यवत् इति पदत्वं भविष्यतीति चेन्न। अर्थवत्येव स्थान्यादेशभावविश्रान्तेर्वाच्यत्वात्, तस्यैवात्र प्रसङ्गसंभवादिति।

अनल्विधौ। आदेशस्य स्थानिभूतो योऽल्, स्थान्यवयवश्च योऽल्, तद्वृत्तिर्यो धर्मः, तदाश्रये कार्ये कर्तव्य आदेशः स्थानिवन्न भवति।

अलिति वर्णपर्यायः। विधीयते इति विधिः, कार्यम्। अलाश्रयो विधिः अल्विधिः। न अल्विधिरनल्विधिरित्यर्थः। यश्चाला विधिः, यश्चालः परस्य विधिः, यश्चालो विधिः, यश्चालि विधिस्तत्र मा भूत्।

१. अला विधिः – व्यूढोरस्केन। व्यूढोरस्केन इत्यत्र सकारस्य रुत्वे, विसर्गे, 'व्यूढोरःकेन' इति जाते 'विसर्जनीयस्य सः' इति विसर्गस्य पुनः सकारे, तस्य स्थानिनो विसर्गस्य स्थानिवत्त्वेनाट्त्वमाश्रित्य, 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यड्व्यवाये प्राप्तं णत्वं न भवति, विसर्गत्वस्य अल्वृत्तिधर्मत्वात्, णत्वस्य चालाश्रयविधित्वात्।

२. अलः परस्य विधिः – द्यौः। दिव्+सु – 'दिव औत्' इति वकारस्य औत् इत्यादेशे, यणि – द्यौः। अत्र वकारस्थानिकस्य औकारस्य स्थानिवद्भावेन हल्त्वात्, 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति प्राप्तः सुलोपो न भवति, वकारवृत्तिहल्त्वधर्मस्य अल्वृत्तित्वात्, सुलोपस्य चालाश्रयविधित्वात्।

पन्थाः। पथिन्+सु इत्यत्र 'पथिमथिऋभुक्षामात्' इति नकारस्याकारे, नकारस्य स्थानिद्भावेन हल्त्वात्, 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति प्राप्तः सुलोपो न भवति, नकारवृत्तिहल्त्वधर्मस्य अल्वृत्तित्वात्, सुलोपस्य चालाश्रयविधित्वात्।

३. अलो विधिः –द्युकामः। दिव्+कामः = 'दिव उत्' इति वकारस्य उत् इत्यादेशे, यणि – द्युकामः। अत्र वकारस्थानिकस्य उकारस्य स्थानिवद्भावेन वकारत्वात्, 'लोपो व्योर्वलि' इति प्राप्तो लोपो न भवति, वकारत्वस्य अल्वृत्तिधर्मत्वात्, वलोपस्य चालाश्रयविधित्वात्।

न चोत्वविधिसामर्थ्याल्लोपो न भवेदिति शङ्क्यम्, द्युयानम्, इत्यादौ तस्य सावकाशत्वात्।

४. अलि विधिः – क इष्टः। इष्ट इति यजेः क्तः। कित्त्वाद् यकारस्य सम्प्रसारणम् इकारः। कस्+इष्टः 'ससजुषो रुः' इति सकारस्य रुत्वे – करु इष्टः। अत्र इकारस्य स्थानिव–

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

द्भावेन हश्त्वात् 'हशि च' इति प्राप्तमुत्वं न भवति, यकारवृत्तिहश्त्वधर्मस्य अल्वृत्तित्वात्, उत्वस्य चालाश्रयविधित्वात्।

न चेह स्थानिवद्भावेन जातेऽप्युत्वे आद्गुणे अवादेशे च कृते 'हलि सर्वेषाम्' इति नित्यलोपेन 'क इष्टः' इति रूपं सिध्यत्येवेति वाच्यम्, कयिष्ट इति रूपान्तरासिद्धिप्रसङ्गात्। सिद्धान्ते तु 'भोभगोअघो०' इति यस्य लोपविकल्पे 'क इष्टः' 'कयिष्टः' इति रूपद्वयमभ्युपगम्यते।

आदेशस्य स्थानिभूतो योऽल्, तदाश्रयविधौ व्यूढोरस्केन इत्याद्युदाहृतम्।

इदानीं स्थान्यवयवालाश्रयविधावुदाह्रियते - प्रतिदीव्य। 'प्रति+दिव्+ल्यप्' 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति क्त्वाप्रत्ययस्य स्थाने ल्यबादेशः। इह क्त्वादेशस्य ल्यपः स्थानिवद्भावेन वलाद्यार्धधातुकत्वाद् प्राप्त इडागमो न भवति। इडागमस्य वलादित्वविषये स्थान्यवयवभूतालाश्रयत्वाद्। स्थान्यवयवश्च क्त्वाघटकस्तकारः। तद्वृत्तिः अल्मात्रवृत्तिश्च धर्मो वल्त्वं, तद्घटितधर्मो वलाद्यार्धधातुकत्वं, तन्निमित्तको विधिः इड्विधिः, तस्मिन् कर्तव्ये स्थानिवद्भावो न भवति, स्थान्यवयवभूतालाश्रयत्वात्।

अतोऽयं 'अदो जग्धिर्ल्यप्ति किति' इति 'ति किति' इत्येव सिद्धे ल्यब्ग्रहणं करोति। क्त्वाप्रत्ययस्य कृत्त्वं समुदायवृत्तिधर्मत्वादनल्धर्मः, अत आदेशे ल्यप्यतिदिश्यते। किन्तु क्त्वाप्रत्ययस्य तकारादित्वं कित्त्वं च अल्वृत्तिधर्मौ। इमावादेशे ल्यपि नातिदिश्येते। कृदित्युक्ते ल्यपो ग्रहणं भवति, 'ति किति' इत्युक्ते ल्यपो ग्रहणं न भवति। अतो 'अदो जग्धिर्ल्यप्ति किति' इति सूत्रे 'ति किति' इत्येव सिद्धे ल्यब्ग्रहणं करोति। तेन ज्ञाप्यते यत् क्त्वाप्रत्ययस्य तकारादित्वं कित्त्वं च ल्यपि नातिदिश्येते, अल्वृत्तिधर्मत्वात्।

इह हि स्थानिप्रयुक्तं यच्छास्त्रीयं कार्यं तदेवातिदिश्यते। अतो नीधातोर्ण्वुलि, वृद्धौ नै+अक, इति स्थिते स्थानिवद्भावेन ईकारधर्मकत्वादायादेशो न स्यादिति न वाच्यम्। ईकारस्य च आयादेशो न शास्त्रविहित इति न तस्य ईकारस्थानिके ऐकारेऽतिदेशः। तेन नायकसिद्धिः।

स्थान्यलाश्रयेत्यत्र स्थानी इति किम्? रामाय। इह 'सुपि च' इति दीर्घः सिध्यति, दीर्घस्य आदेशगतयकाररूपालाश्रयत्वेऽपि स्थान्यलाश्रयत्वाभावात्।

अनुबन्धकार्ये अनल्विधौ इति निषेधो न -प्रस्थाय। प्र+स्था+क्त्वा। 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति क्त्वाप्रत्ययस्य स्थाने ल्यबादेशः। अस्मिन् ल्यबादेशे स्थानिनः क्त्वाप्रत्ययस्य स्थान्यवयवस्य ककारस्य अल्धर्मः कित्त्वमतिदिश्यते। कित्त्वाद् 'घुमास्थागापाजहातिसां हलि' इत्यनेन ईत्वं प्राप्नोति, तद्वारणाय सूत्रकारेण **'न ल्यपि'** इति निषेधः क्रियते।

न चाल्विधित्वात्कथमिह स्थानिवद्भाव इति शङ्क्यम्, 'न ल्यपि' इति ज्ञापका-दनुबन्धकार्येषु अनल्विधौ इति निषेधस्याप्रवृत्तेः।

ननु अनुबन्धकार्ये अनल्विधौ इति निषेधस्याप्रवृत्तौ 'वच परिभाषणे' इत्यस्माद्धातोः कर्मणि लृटि, 'लृटः सद्वा' इति लृटः स्थाने शानजादेशे, 'स्यतासी लृलुटोः' इति स्ये वक्ष्यमाण

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

इति रूपाद् शानचष्टित्त्वादुगित्वाच्च ङीप् प्राप्नोतीति न –

लाश्रयमनुबन्धकार्यं नादेशानाम् – लाश्रयमनुबन्धकार्यमादेशानां न भवति। लृट् इति लकारः, तदाश्रितं टित्त्वम्, उगित्त्वं च आदेशे शानचि न भवतः। कुत एतदित्युच्यते – 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति लिङादेशानां तिप् तस् झि इत्यादिपरस्मैपदानां यासुडागमस्य ङित्त्वं विहितम्। 'यदागमा' इति न्यायेन यासुडागमो लिङादेशावयवः। ततश्च स्थानिवत्त्वेनैव ङित्त्वसिद्धेर्यासुटो ङिद्विधेर्वैयर्थ्यं स्यात्। अतो यासुटो ङित्करणेन ज्ञाप्यते यद् – 'लाश्रयमनुबन्धकार्यम् आदेशानां न'। ततश्च 'वक्ष्यमाणा' इत्यत्र लृडादेशस्य शानचः टिदुगित्कार्ये ङीपि कर्तव्ये स्थानिवत्त्वाभावात् न ङीप् इत्यपि न, यतो 'लाश्रयमनुबन्धकार्यं नादेशानाम्' इत्यत्र यासुटो ङित्त्वं न ज्ञापकम्, अनुबन्धकार्ये सर्वत्र अनल्विधाविति निषेधाभावे सत्यपि यासुटो ङित्त्वस्य तिप्सिप्मिबागमयासुटो ङित्त्वार्थमावश्यकत्वात्।

न हि लिङादेशत्वेऽपि तिप्सिप्मिपां ङित्त्वं स्थानिवत्त्वलभ्यम्, 'हलः श्नः शानज्झौ' इति सूत्रभाष्ये पिदर्थं ङित्त्वमित्युक्तत्वात्। अथ च 'सार्वधातुकमपित्' इति सूत्रभाष्योक्तेन 'ङिच्च पिन्न पिच्च ङिन्न' इति प्रपञ्चितत्वात् पित्सु ङित्त्वाप्रसक्तेः। अतो यासुटो ङित्त्वं 'लाश्रयमनुबन्धकार्यं नादेशानाम्' इत्यस्य न ज्ञापकम्, तेन 'वक्ष्यमाणा' इत्यत्र टिदुगित्कार्यं ङीप् प्राप्नोत्येवेत्युच्यते –

'हलः श्नः शानज्झौ' इत्यनेन श्नाप्रत्ययस्य शानजादेशो विधीयते। तत्र स्थानिवत्त्वेनैव शित्त्वस्य सिद्धत्वात् शानचः शित्करणं व्यर्थं सज्ञापयति यत् 'क्वचिदनुबन्धकार्येऽपि अनल्विधौ इति निषेधो भवति', तन्न। 'हलः श्नः शानज्झौ' इत्यस्मिन् सूत्रभाष्य एव शानचः शित्त्वस्य प्रत्याख्यातत्वात्। प्रत्युत शित्त्वस्य ज्ञापकत्वे 'क्वचिदनुबन्धकार्येऽपि अनल्विधौ इति निषेधो भवति' इत्यस्य स्वीकारे तु 'सेर्ह्यपिच्च' इत्यस्य अपित्करणं व्यर्थं स्यात्, 'तुह्योस्तातङ्-ङाशिष्यन्यतरस्याम्' इत्यत्र तातङो ङित्करणं च व्यर्थं स्यात्।

तस्माद् वक्ष्यमाणा इत्यत्र ङीपि प्राप्ते अजादित्वाट्टाप् भवति।

अचः परस्मिन् पूर्वविधौ (पा. सू. १.१.५७)

'आदेशः' 'स्थानिवद्' इति वर्तते। परस्मिन्निति निमित्तसप्तमी। पूर्वविधाविति विषयसप्तमी। अयं विधिशब्दोऽस्त्येव कर्मसाधनो–विधीयते इति विधिरिति। पूर्वस्य विधिः पूर्वविधिः। अस्ति च भावसाधनो–विधानं विधिरिति। पूर्वत्वस्य विधिः पूर्वविधिः।

अच इति षष्ठी, तेन अचः स्थाने य आदेश, इत्यर्थो भवति। अच इति दिग्योगलक्षणा पञ्चमी च। तस्माद् स्थानिभूतादचः पूर्वो यो विधिः तस्मिन् कर्तव्ये इत्यर्थो भवति।

परनिमित्तोऽजादेशः स्थानिवद् भवति, स्थानिभूतादचः पूर्वत्वेन दृष्टविधौ कर्तव्ये।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

पूर्वेणानल्विधौ स्थानिवद्भाव उक्तः। तेन स्थानिवत्सूत्रेणैव सिद्धे अलाश्रयविधावपि स्थानिवद्भावार्थमिदमारभ्यते।

तेन वव्रश्च, इत्यत्र वस्य सम्प्रसारणं न। 'ओव्रश्चू छेदने' इत्यस्माद्धातोः लिटि, तिपि, णलि द्वित्वम्। 'लिट्यभ्यासस्य०' इति सम्प्रसारणे अभ्यासे रेफस्य ऋकारः। पूर्वरूपम्, उरदत्वं, रपरत्वं, हलादिः शेषः – वव्रश्च। अत्राभ्यासे वकारस्य पुनः सम्प्रसारणं न भवति, ऋकारस्थानिकस्य उरदत्वस्य, स्थानिवद्भावेन सम्प्रसारणतया 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधात्। न च उरदत्वं परनिमित्तं नेति वाच्यम्, अङ्गाक्षिप्ते प्रत्यये परे तद्विधानात्। पूर्वसूत्रेणात्र स्थानिवद्भावो न सम्भवति, 'न सम्प्रसारणे सम्प्रसारणम्' इति सम्प्रसारणनिषेधस्य स्थान्यलाश्रयत्वादिति।

पूर्वत्वं यद्यपि सावधिकम्, तथापि सन्निहितस्यैवाधित्वमुचितम्। सन्निहितं चात्र त्रयं, स्थानी, आदेशो निमित्तं च। तत्र स्थान्यपेक्षयैव पूर्वत्वमत्र विवक्षितम्।

पटयति। पटुमाचष्ट इति णिचि टिलोपे कृते तस्य स्थानिवद्भावाद् 'अत उपधायाः' इति वृद्धिर्न भवति।

अवधीत्। अतो लोपस्य स्थानिवद्भावाद् 'अतो हलादेर्लघोः' इति हलन्तलक्षणो वृद्धिविकल्पो न भवति।

बहुखट्वकः। 'आपोऽन्यतरस्याम्' इति ह्रस्वे कृते 'ह्रस्वान्तेऽन्त्यात्पूर्वम्' इत्येष स्वरः प्राप्नोति। स्थानिवद्भावाद् न भवति।

'स्थानिवदादेशोऽनल्विधौ' इत्यनेन पूर्वसूत्रेण भावातिदेशो भवति। अनेन पुनर्भावाभावयोरुभयोरपि। तेन –

स्थानिनि सति यद्भवति तदादेशेऽपि भवतीति शास्त्रीयस्य कार्यस्यातिदेशः, भावरूपः। तत्र वव्रश्चेति उदाहृतमेव। 'ओव्रश्चू छेदने' लिटि, तिपि, णलि द्वित्वे लिट्यभ्यासस्येति अभ्यासे रेफस्य सम्प्रसारणे, हलादिः शेषे 'वृव्रश्च' इत्यवस्थायां 'उरत्' इत्यजादेशात् पूर्वं ऋकारे स्थानिनि सति 'न सम्प्रसारणे सम्प्रसारणम्' इति सम्प्रसारणनिषेधः प्राप्नोति। स च शास्त्रीयो निषेधः, 'उरत्' इत्यकारादेशेऽपि भवति।

निगाल्यते। निपूवाद् गृनिगरणे इति धातोः णिचि 'निगारि' इत्यस्मात् कर्मणि यकि–निगारि+य+ते, इत्यत्र 'णेरनिटि' इति णेर्लोपात् पूर्वं णौ स्थानिनि सति, 'अचि विभाषा' इत्यनेन रेफस्य लत्वं प्राप्नोति, तच्च लत्वं णिलोपे कृतेऽपि भवति।

स्थानिनि सति यन्न भवति तदादेशेऽपि न भवति, इत्यशास्त्रीयस्यापि कार्याभावस्यातिदेशोऽभावरूपः। तेन गणयति, पटयति, अवधीत्, इत्यादयः सिध्यन्ति। 'गण+णिच्' इत्यवस्थायां 'अतो लोपः' इत्यजादेशात्पूर्वमकारे स्थानिनि सति 'अत उपधाया' इति उपधावृद्धिर्न प्राप्नोति। सा च लोपादेशेऽपि न भवति, वृद्ध्यभावस्याशास्त्रीयत्वेऽपि

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

अल्लोपेऽतिदेशात्। न चात्र गकारादकारस्य स्थान्यकारान्न पूर्वत्वम्, णकारेण व्यवधानादिति वाच्यम्, पूर्वत्वं ह्यत्र व्यवहिताव्यवहितसाधारणं गृहीतम्।

वैयाकरणः। 'वि+आ+करण' इत्यत्र 'इको यणचि' इति यणादेशे 'व्याकरण' इत्यस्मादण्प्रत्यये 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इत्यनेन यकारात्पूर्वमैजागमे कृते 'वैयाकरण' इति जाते, यकारस्य स्थानिवत्त्वात् प्राप्तः, 'एचोऽयवायावः' इति आयादेशो न भवति, स्थानिनि इकारे सति ऐकारस्याविद्यमानत्वात्।

सौवश्वः।'सु+अश्व''इत्यत्र 'इको यणचि'इति यणादेशे'स्वश्वः' इत्यस्मादण्प्रत्यये 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इत्यनेन वकारात्पूर्वमैजागमे कृते 'सौवश्व' इति जाते वकारस्य स्थानिवत्त्वात् प्राप्तः, 'एचोऽयवायावः' इति आवादेशो न भवति, स्थानिनि उकारे सति औकारस्याविद्यमानत्वात्।

इत्थञ्च स्थानिनिमित्तकं कार्यं भवति, आदेशनिमित्तकं कार्यं न भवति।

वाय्वोः। अध्वर्य्वोः। वायु+ओस्, अध्वर्यु+ओस्, इत्यत्र यणादेशे कृते वाय्वोः, अध्वर्य्वोः, इति जाते यणादेशस्य वकारस्य स्थानिवत्त्वात् 'लोपो व्योवलि' इति प्राप्तो यकारलोपो न भवति।

किर्योः। गिर्योः। किरि+ओस्, गिरि+ओस्, इत्यादिषु यणादेशे कृते किर्योः, गिर्योः, इति जाते यणादेशस्य यकारस्य स्थानिवत्त्वात् 'हलि च' इति प्राप्तो दीर्घो न भवति।

विव्यतुः। विवि+अतुः, इत्यत्र यणादेशे कृते विव्यतुः इति जाते यणादेशस्य वकारस्य स्थानिवत्त्वात् 'उपधायां च' इति प्राप्तो दीर्घो न भवति।

न च वाय्वोः, अध्वर्य्वोरित्यत्र यलोपे कर्तव्ये, किर्योः, गिर्योः, विव्यतुः, इत्यत्र च दीर्घे कर्तव्ये, 'न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु' इत्यनेन उकारादेशस्य वकारस्य, इकारादेशस्य च यकारस्य च स्थानिवत्त्वनिषेधः स्यादिति वाच्यम्, स्वरदीर्घयलोपेषु कर्तव्येषु, लोप एवाजादेशो न स्थानिवदिति वार्तिके परिगणनात्।

धिन्वन्ति। 'धिवि प्रीणने' 'कृवि गतौ' इति धातोर्लटि प्रथमपुरुषस्य झेरन्तादेशे 'धिन्व्+अन्ति' इत्यत्र 'धिन्विकृण्व्योर च' इति वकारस्य स्थाने अकारादेशे, उविकरणे, अतो लोपे 'धिन्+उ+अन्ति' इति जाते विकरणस्योकारस्य यणि वकारे सति 'धिन्+व्+अन्ति' इत्यत्रादेशो यो वकारः तस्य स्थानी योऽल् उकारः, तद्वृत्तिर्धर्म यदार्धधातुकत्वम्, तच्च नास्ति अल्मात्रवृत्तिधर्मः। नास्ति च स्थानिता अल्त्वमात्रावच्छिन्ना।

स्थान्यवयवाल्मात्रवृत्तिधर्मनिमित्तक एव विधौ कर्तव्ये 'अनल्विधौ' इति निषेधो भवति। आर्धधातुकत्वं तु नास्ति स्थान्यवयवाल्मात्रवृत्तिधर्मः, स च 'स्य' 'तास्' 'अनीयर्' 'कानच्' इत्यादिषु समुदायेष्वपि दृश्यते, अतस्तन्निमित्तके विधौ कर्तव्ये 'अनल्विधौ' इति निषेधाभावात्, तदाश्रये 'आर्धधातुकस्येड् वलादेः' इति इडागमे कर्तव्ये 'अनल्विधौ' इति

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

निषेधो न प्राप्नोति, तेन चार्धधातुकत्वमादेशे वकारेऽतिदिश्यते, वलादित्वं च वकारे स्वतो वर्तते, तेन च वलाद्यार्धधातुकत्वात् इडागमः प्राप्नोति, स च 'अचः परस्मिन् पूर्वविधौ' इत्यनेन वकारस्य स्थानिवद्भावान्न भवति।

नन्वयमिडागमस्तु वकारस्यैव प्राप्नोति, न तु वकारात् पूर्वस्येति कथं भवेद् 'अचः परस्मिन् पूर्वविधौ' इत्यनेन वकारस्य स्थानिवद्भाव इति न। विधीयते इति विधिरिति कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिष्टं संगृहीतं भवतीति कृत्वा भाष्यकृता भावसाधनस्य विधिशब्दोऽप्यत्र स्वीक्रियते। पूर्वः स्यादिति विधिः पूर्वविधिः। पूर्वताविधानमिति यावद्। 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमस्य पूर्वताविधानं क्रियते। अतोऽस्मिन् कर्तव्ये आदेशः स्थानिवद्भवतीति।

अच इति किम्? प्रश्नः। प्रश्न इति प्रच्छेर्नङ्प्रत्यये 'च्छ्वोः शूडनुनासिके च' इति छकारस्य शकारः परनिमित्तकस्तुकि कर्तव्ये न स्थानिवद् भवति, अजादेशाभावात्।

आक्राष्टाम्। आक्राष्टामिति 'झलो झलि' इति सिचो लोपः परनिमित्तकः कृषेः षकारस्य 'षढोः कः सि' इति ककारे कर्तव्ये न स्थानिवद् भवति, अजादेशाभावात्।

आगत्य। आगत्येति 'वा ल्यपि' इत्यनुनासिकलोपः परनिमित्तकस्तुकि कर्तव्ये न स्थानिवद् भवति, अजादेशाभावात्।

परस्मिन्निति किम् ? युवजानिः। युवती जाया यस्य सः, इति बहुव्रीहौ पुंवद्भावे युवन् जाया, इत्यत्र नलोपे , 'जायाया निङ्' इत्याकारस्य स्थाने निङादेशे – युवजाय् नि, इति स्थिते 'लोपो व्योर्वलि' इति यलोपे कर्तव्ये निङादेशः स्थानिवन्न भवति, परनिमित्तकत्वाभावात्।

वैयाघ्रपद्यः। व्याघ्रस्येव पादावस्येति बहुव्रीहौ, 'पादस्य लोपोऽहस्त्यादिभ्यः' इति लोपसमासान्ते 'व्याघ्रपाद्' इत्यस्माद् गर्गादित्वाद् यञि, 'पादः पत्' इति पदादेशे कर्तव्ये पादस्य अकारलोपः स्थानिवन्न भवति, परनिमित्तकत्वाभावात्।

आदीध्ये। दीधीङ उत्तमपुरुषैकवचने टेरेत्वस्यापरनिमित्तकत्वाद् 'यीवर्णयो-र्दीधीवेव्योः' (७.४.५३) इति लोपो न भवति।

पूर्वविधाविति किम् ? हे गौः। गो+सु 'अचो ञ्णिति' इति वृद्धौ – गौ+सु इत्यत्र वृद्धिरजादेशः 'एङ्ह्रस्वात् सम्बुद्धेः' इति सम्बुद्धिलोपे कर्तव्ये न स्थानिवद् भवति, पूर्वविधित्वाभावात्।

बाभ्रवीयाः। बभ्रोरपत्यं बाभ्रव्यम्। 'मधुबभ्रवोर्ब्राह्मणकौशिकयोः' इति यञ्। 'ओर्गुणः'इ इति गुणे 'वान्तो यि प्रत्यये' इत्यवादेशः। बाभ्रव्यस्यामीच्छात्रा इति 'वृद्धाच्छः' इति छे–बाभ्रव्य+ईय, इति जाते 'हलस्तद्धितस्य' इति यकारलोपे कर्तव्येऽवादेशो न स्थानिवद् भवति, पूर्वविधित्वाभावात्।

नैधेयः। 'उपसर्गे घोः किः' इति किप्रत्यये – नि+धा+कि इत्यत्र 'आतो लोप इटि

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

च' इत्याकारलोपे निधिः। अस्माद् 'इतश्चानिञः' इति द्व्यज्लक्षणे प्रत्ययविधावाकारलापो न स्थानिवद् भवति, पूर्वविधित्वाभावात्।

पूर्वत्रासिद्धे न स्थानिवत् – त्रिपादीस्थे कार्ये कर्तव्य आदेशः स्थानिवन्न भवति। इदं 'न पदान्त०' सूत्रावसरे १३ पृष्ठे व्याख्यास्यते।

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु

(पा. सू. १.१.५८)

पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तोऽजादेशः स्थानिवन्न भवति। पूर्वेणातिप्रसक्तः स्थानिवद्भाव एतेषु विधिषु प्रतिषिध्यते।

पदान्तश्च, द्विर्वचनं च, वरे च, यलोपश्च, स्वरश्च, सवर्णश्च, अनुस्वारश्च, दीर्घश्च, जश्च, चर्चेति द्वन्द्वः। तेषां विधयः विधानानि। कर्मणि षष्ठ्या समासः। ततश्च पदान्तादिषु विधेयेषु इति लभ्यते। विधिशब्दो धाधातोः किप्रत्यये कर्मसाधनः। स च प्रत्येकमन्वेति, तेन पदान्तविधौ, द्विर्वचनविधौ, इत्यादि ज्ञेयम्।

पदान्त – पदान्तविधिं प्रत्यजादेशो न स्थानिवद् भवति। कौ स्तः। यौ स्तः। इत्यत्र 'श्नसोरल्लोपः' इत्यल्लोपः, क्ङिति सार्वधातुके भवति, अतः परनिमित्तकः। स चाल्लोपः पूर्वविधावावादेशे कर्तव्ये 'अचः परस्मिन् पूर्वविधौ' इत्यनेन स्थानिवत् स्यात्, अस्माद् वचनाद् न भवति।

तानि सन्ति। यानि सन्ति। इत्यत्रापि 'श्नसोरल्लोपः' इत्यल्लोपः, क्ङिति सार्वधातुके भवति, अतः परनिमित्तकः। स चाल्लोपः पूर्वविधौ यणादेशे कर्तव्ये 'अचः परस्मिन् पूर्वविधौ' इत्यनेन स्थानिवत् स्यात्, अस्माद् वचनाद् न भवति।

पदान्त इत्यत्र अन्तशब्दः चरमावयववाची। पदचरमावयवसम्पादको विधिरित्यर्थः। तादृशो विधिः, येन पदस्य चरमावयवः सम्पद्यते। तेन पदान्तस्य स्थाने विधौ इति तु न व्याख्यातम्। तथा सति 'एषो यन् हसति', इत्यसिद्धेः। इण्धातोर्लटः शतरि शपि लुकि इकारस्य 'इणो यण्' इति यण्। एषस् यन् हसति, इति। अत्र हलि परतो विधीयमानः 'एतत्तदो'रिति सुलोपो न भवति। इह च तस्मिन् कर्तव्ये 'अचः परस्मिन् पूर्वविधौ' इति इकारस्थानिकस्य यकारस्य स्थानिवद्भावेनाच्त्वात्। न च 'न पदान्तद्विर्वचने'ति निषेधः शङ्क्यः। यो विधीयमानस्य पदस्य चरमावयवः सम्पद्यते, तत्रैव पदान्त इति स्थानिवद्भावनिषेधो भवति। अत्र 'एषस् यन् हसति', इत्यत्र विधेयस्य सुलोपस्य पदस्यानवयवत्वात् स्थानिवद्भावनिषेधो न भवति। तेन हल्परकत्वाभावात् सुलोपो न भवति।

पुनश्च 'एषस् यन् हसति', इत्यत्रैव सकारस्य रुत्वे, उत्वे च प्राप्ते विधेयस्य उकारस्य पदस्य चरमावयवत्वात् स्थानिवद्भावनिषेधो भवति। तेन हश्परकत्वात् रोरुत्वे 'एषो यन्

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

हसति', इति सिध्यति। इत्थञ्च 'एषो यन् हसति', इत्येतदुत्वविषये पदान्तविधौ इत्यस्योदाहरणम्, सुलोपविषये तु प्रत्युदाहरणमिति।

द्विर्वचन-द्विर्वचनविधिं प्रत्यजादेशो न स्थानिवद् भवति।

दद्ध्यत्र। मद्ध्वत्र। यणादेशः परनिमित्तकः, तस्य 'अचः परस्मिन् पूर्वविधौ' इत्यनेन स्थानिवद्भावाद् 'अनचि च' इति धकारस्य द्विर्वचनं न स्यादस्माद् वचनाद् भवति।

वरे-वरे योऽजादेशः स पूर्वविधिं प्रति न स्थानिवद् भवति।

यायावरः। अप्सु यायावरः प्रवपेत पिण्डान्। यातेर्यङन्ताद् 'यश्च यङः' इति वरचि कृते यायाय+वर इत्यत्र 'अतो लोपः' इति अल्लोपे, 'लोपो व्योर्वलि' इति यलोपे-याया+वर इति जाते, परनिमित्तकस्य 'अतो लोपः' इत्यल्लोपस्य 'अचः परस्मिन् पूर्वविधौ' इत्यनेन स्थानिवत्त्वाद् 'आतो लोप इटि च' (६.४.६४) इत्यजादौ क्ङित्यार्धधातुके आकारलोपः स्याद्, अस्माद् वचनाद् न भवति।

यलोप-यलोपविधिं प्रत्यजादेशो न स्थानिवद् भवति।

कण्डूतिः। कण्डूय+क्तिच् इत्यत्र परनिमित्तको 'अतो लोपः' 'लोपो व्योर्वलि' इति यलोपे कर्तव्ये 'अचः परस्मिन् पूर्वविधौ' इत्यनेन स्थानिवत् स्याद्, अस्माद् वचनाद् न भवति, तेन यलोपो भवति।

यातिः। यातेर्यङन्तात् क्तिच्। यायाय+ति, 'अतो लोपः' इति अल्लोपे, 'लोपो व्योर्वलि' इति यलोपे - याया+ति इति जाते 'आतो लोप इटि च' इत्यनेन क्ङित्यजादावार्धधातुके आकारलोपे कर्तव्ये अल्लोपः स्थानिवद् भवति, तेन क्ङित्यजादावार्धधातुके आल्लोपो भवति - याय्+ति। पुनश्च 'लोपो व्योर्वलि' इति यलोपे कर्तव्येऽस्माद् वचनाद् अल्लोपः स्थानिवन्न भवति, तेन यलोपो भवति - यातिः, इति।

पिपठीः। पिपठिष+क्विप्, इत्यत्र क्विप्प्रत्ययस्य सर्वापहारिलोपे, 'अतो लोपः' इत्यतो लोपे, पिपठिस्, इत्यस्मात् सौ हल्ङ्यादिलोपे, सकारस्य रुत्वे पिपठिर्, इत्यत्र 'र्वोरुपधाया दीर्घ इकः' इति दीर्घे कर्तव्ये अतो लोपस्य स्थानिवद्भावनिषेधात् 'पिपठीः' इति सिध्यति।

स्वरदीर्घयलोपेषु कर्तव्येषु, लोप एवाजादेशो न स्थानिवत् (**वार्तिकम्**) -

न च 'वाय्वोः' 'अध्वर्य्वो'रित्यत्रापि 'लोपो व्योर्वलि' इति यलोपे कर्तव्ये उकारादेशस्य वकारस्य स्थानिवत्त्वनिषेधः स्यादिति वाच्यम्, स्वरदीर्घयलोपेषु कर्तव्येषु, लोप एवाजादेशो न स्थानिवदिति वार्तिके परिगणनात्। इह च वकारस्य लोपरूपत्वाभावात् स्थानिवद्भावनिषेधो न भवति, तेन वकारस्य स्थानिवद्भावाद् यकारलोपो न। एवं 'किर्योः' 'गिर्योः' 'विव्यतुः' इत्यादिषु लोपरूपादेशत्वाभावाद् स्थानिवद्भावनिषेधो न भवति, तेन दीर्घे कर्तव्ये इकारस्य स्थानिवद्भावाद् 'हलि च' 'उपधायां च' इत्यादीनामप्रवृत्तिः सिध्यति।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

यत्र वरे अजादेशप्रसङ्गो नास्ति, यातिरित्यादौ, तत्र स्थानिवद्भावं निषेद्धुं वरेग्रहणात्पृथग्यलोपग्रहणं कृतमिति ज्ञेयम्।

स्वर-स्वरविधिं प्रत्यजादेशो न स्थानिवद् भवति। चिकीर्षकः (चिकीर्ष+ण्वुल्)। जिहीर्षकः। ण्वुलि कृते 'अतो लोपः' परनिमित्तको 'लिति' प्रत्ययात् पूर्वमुदात्तमिति स्वरे कर्तव्ये 'अचः परस्मिन् पूर्वविधौ' इत्यनेन स्थानिवत् स्याद्, अस्माद् वचनाद् न भवति।

सवर्ण-सवर्णविधिं प्रत्यजादेशो न स्थानिवद् भवति। शिण्ढि। पिण्ढि। शिष् इति रौधादिकाद्धातोर्लोट्, मध्यमपुरुषैकवचने सिप्, 'रुधादिभ्यः श्नम्' इति श्नम्। हित्वम्, धित्वम्, ष्टुत्वम्। शिनष्+ढि, षकारस्य जश्त्वे शिनड्+ढि। 'श्नसोरल्लोपः' इति क्ङिति सार्वधातुके अल्लोपे शिन्ड्+ढि, 'नश्चापदान्तस्य झलि' इत्यनुस्वारे कृते, 'अनुस्वारस्य ययि परसवर्णः' इति परसवर्णे कर्तव्ये 'अचः परस्मिन् पूर्वविधौ' इत्यनेनाल्लोपः स्थानिवत् स्याद्, अस्माद् वचनाद् न भवति।

अनुस्वार-अनुस्वारविधिं प्रत्यजादेशो न स्थानिवद् भवति। शिंषन्ति। पिंषन्ति। 'नश्चापदान्तस्य झलि' इत्यनुस्वारे कर्तव्ये 'श्नसोरल्लोपः' इत्यल्लोपः, 'अचः परस्मिन् पूर्वविधौ' इत्यनेन स्थानिवत् स्याद्, अस्माद् वचनाद् न भवति। इह तु न परसवर्णः, षकारस्य यय्त्वाभावात्।

दीर्घ-दीर्घविधिं प्रत्यजादेशो न स्थानिवद् भवति। प्रतिदीव्ना। प्रतिदीव्ने। प्रतिदिवन्नित्येतस्य 'भस्य' इत्यधिकृत्य तृतीयैकवचने चतुर्थ्येकवचने च 'अल्लोपोऽनः' इत्यकारलोपः परनिमित्तकः, तस्य 'अचः परस्मिन् पूर्वविधौ' इत्यनेन स्थानिवद्भावाद् 'हलि च' इति दीर्घत्वं न स्यात्, न ह्ययं वकारो हल्पर इति, अस्माद् वचनाद् भवति।

जश्-जश्विधिं प्रत्यजादेशो न स्थानिवद् भवति। सग्धिश्च मे सपीतिश्च मे (मा.सं. १८.९)। बब्धां ते हरीं धानाः (नि. ५.१२)।

सग्धिः। अदेः क्तिनि 'बहुलं छन्दसि' इति घस्लादेशः, 'घसिभसोर्हलि च' इत्युपधालोपः, 'झलो झलि' इति सकारलोपः, 'झषस्तथोर्धोऽधः' इति धत्वम्। 'अचः परस्मिन् पूर्वविधौ' इत्यनेन उपधालोपस्य स्थानिवत्त्वात् 'झलां जश् झशि' इति घकारस्य जश्त्वं न स्याद्, अस्माद् वचनाद् भवति। समाना ग्धिः सग्धिः। समानस्य सभावः।

बब्धाम्। भसेर्लोडद्विवचने शपः श्लुः, द्विर्वचनम्, अभ्यासकार्यम्, 'घसिभसोर्हलि च' इत्युपधालोपः, 'झलो झलि' इति सकारलोपः, 'झषस्तथोर्धोऽधः' इति धत्वम्। 'अचः परस्मिन् पूर्वविधौ' इत्यनेन उपधालोपस्य स्थानिवत्त्वात् 'झलां जश् झशि' इति भकारस्य जश्त्वं न स्याद्, अस्माद् वचनाद् भवति।

चर्-चर्विधिं प्रत्यजादेशो न स्थानिवद् भवति। जक्षतुः। जक्षुः। अक्षन् पितरोऽमीमदन्त पितरः (मा. सं. १९.३६)। लिड्द्विवचनबहुवचनयोरदेर्घस्लादेशः, 'गमहन-

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

जनखनघसाम्०' इत्युपधालोपः, द्विर्वचनम्, अभ्यासकार्यम्। तत्र 'अचः परस्मिन् पूर्वविधौ' इत्यनेनोपधालोपस्य स्थानित्त्वात् 'खरि च' इति घकारस्य चर्त्वं न स्याद्, अस्माद् वचनाद् भवति। 'शासिवसिघसीनां च' इति षत्वम्।

अक्षन्नित्यदेर्लुङ्बहुवचने घस्लादेशः च्लेरागतस्य 'मन्त्रे घसह्वर०' इति लुक्। 'गमहनजनखनघसाम्०' इत्युपधालोपः, 'अचः परस्मिन् पूर्वविधौ' इत्यनेन तस्य स्थानिवत्त्वात् 'खरि च' इति चर्त्वं न स्याद्, अस्माद् वचनाद् भवति।

स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद् भवति। अन्यस्तु स्थानिवदेव। तेन बहुखट्वकः, किर्योः, किर्योः, वाय्वोरिति स्थानिवत्त्वात् स्वरदीर्घयलोपा न भवन्ति।

क्लिलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम्(वार्तिकम्) – एतेषु विधिष्वपि परनिमित्तोऽजादेशः स्थानिवन्न भवति।

क्वौ विधिं प्रति न स्थानिवत् – लवमाचष्टे लौः। पवमाचष्टे पौः। लवशब्दात् 'तत्करोति तदाचष्टे' इति णिचि 'टेः' इति टिलोपे 'लवि' इति जाते क्वौ, 'णेरनिटि' इति णिलोपस्य स्थानिवत्त्वनिषेधाद् 'च्छ्वोः शूडनुनासिके च' इत्यूठि, लौः इति सिध्यति। एवं पौः।

लुकं प्रति न स्थानिवत् – पञ्चेन्द्रः, दशेन्द्रः, पञ्चाग्निः, दशाग्निः। पञ्च इन्द्राण्यो देवता अस्येति पञ्चेन्द्रः। अत्र 'साऽस्य देवता' इत्यण्। तस्य 'द्विगोर्लुगनपत्ये' इति लुक्। ततो 'लुक् तद्धितलुकि' इति ङीषो लुकि तस्य स्थानिवत्त्वनिषेधाद् ङीषा संनियुक्त आनुक् न श्रूयते। एवं पञ्च अग्नाय्यो देवताऽस्य पञ्चाग्निः, इत्यत्र लुकः स्थानिवत्त्वनिषेधाद् 'वृषाकप्यग्निकुसितकुसीदानामुदात्तः' इति विधीयमान ऐकारो न श्रूयते।

उपधात्वं प्रति न स्थानिवत् – परिखाशब्दात् चातुरर्थिकेऽणि कृते ''यस्येति च इत्याकारलोपे 'पारिखः' इति सिध्यति। तस्याकारलोपस्य स्थानिवत्त्वनिषेधात् पारिखे भवः इति 'वृद्धादकेकान्तखोपधाद्' इति छे 'पारिखीयः' इति सिध्यति।

चङ्परनिर्ह्रासे न स्थानिवत् – वादितवन्तं प्रयोजितवान्, अवीवदद् वीणाम्। वादकः वीणां वादयति इति वदेर्णिच्। तमपरः प्रयुङ्क्ते इति णिजन्तात् 'वादि' इत्यस्मात् पुनर्णिचि अवीवदद् वीणाम् इति। अत्र 'अ+वादि+णिच्+चङ्+त्' इत्यत्र 'णेरनिटि' इत्यनेन णौ णिचो लोपे 'अवाद्+इ+अत्', इति जाते, 'णेरनिटि' इत्यनेन द्वितीयस्य णिचो लोपस्य कर्तव्यतायां 'अचः परस्मिन् पूर्वविधौ' इति पूर्वस्य णिचः स्थानिवद्भावे 'णौ चङ्युपधाया ह्रस्वः' इत्युपधाह्रस्वो न सिध्यति। अनेन पुनः स्थानिवत्त्वनिषेधात् सिध्यति।

कुत्वं प्रति न स्थानिवत् – अर्च्यते इति अर्कः। मर्च्यते इति मर्कः। अर्चधातोः, मर्चधातोः 'अकर्तरि च कारके संज्ञायाम्' इति कर्मणि घञि 'अर्च्+णिच्+घञ्' इत्यत्र 'णेरनिटि' इति णिलोपस्य स्थानिवद्भावे 'चजोः कु घिण्ण्यतोः' इति कुत्वं न सिध्यति। अनेन

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

पुनः स्थानिवत्त्वनिषेधात् सिध्यति। अर्कः, मर्कः, इति।

पूर्वत्रासिद्धे न स्थानिवत् – सपादसप्ताध्यायीं प्रति त्रिपाद्या असिद्धत्वेन, तत्रत्ये कार्ये कर्तव्ये 'अचः परस्मिन् पूर्वविधौ' इत्यतिदेशस्याप्रवृत्तेः आदेशः स्थानिवन्न भवति।

अस्मिन् सूत्रे पदान्तद्विर्वचनवरेयलोपस्वरा, इत्येते विधयः सापादिकाः। सवर्णानुस्वार-दीर्घजश्चर इत्येते विधयस्त्रैपादिकाः। एते त्रैपादिकविधयः सपादसप्ताध्यायीदृष्ट्या असिद्धा एव, अतस्तदर्थं स्थानिवद्भावनिषेधोऽनावश्यक एव। इदमवष्टभ्य भाष्ये द्विर्वचनसवर्णानुस्वार-दीर्घजश्चरः प्रत्याख्याताः।

तर्हि सूत्रे द्विर्वचनसवर्णानुस्वारदीर्घजश्चरां ग्रहणं किमर्थम् ? 'अचः परस्मिन् पूर्वविधौ' इत्येतदन्यवतिघटितातिदेशानां त्रिपाद्यामपि प्रवृत्तिबोधनार्थम्।

किञ्च 'दीर्घादाचार्याणाम्' इत्युत्तरम् 'अनुस्वारस्य ययि परसवर्णः' 'वा पदान्तस्य' 'तोर्लि' 'उदः स्थास्तम्भोः पूर्वस्य' 'झयो होऽन्यतरस्याम्' 'शश्छोऽटि' इति षट्सूत्रीपाठोत्तरं 'झलां जश् झशि' 'अभ्यासे चर्च' 'खरि च' 'वाऽवसाने' 'अणोऽप्रगृह्यस्यानुनासिकः' इति पञ्चसूत्रीपाठ इति 'हलो यमां यमि लोपः' इति सूत्रस्थभाष्यसम्मतः सूत्रक्रमः। एवं च शिण्ड्वि इत्यत्र न परसवर्णप्रसक्तिः। परसवर्णे कर्तव्ये षकारस्थानिकस्य जश्त्वस्यासिद्धत्वेन यय्परकत्वा-भावादिति सर्वथापि सवर्णविधौ शिण्ड्वीति नोदाहरणम्।

तस्य दोषः संयोगादिलोपलत्वणत्वेषु – 'पूर्वत्रासिद्धे न स्थानिवत्' इत्यनेन त्रिपादीस्थे कार्ये कर्तव्ये 'अचः परस्मिन् पूर्वविधौ' इत्यतिदेशस्याप्रवृत्तिरुक्ता। **किन्तु संयोगादिलोपे, लत्वे, णत्वे च कर्तव्ये त्रिपाद्यामपि 'अचः परस्मिन् पूर्वविधौ' इति स्थानिवद्भावो भवत्येव।**

संयोगादिलोपः –काक्यर्थम्। चक्र्यत्र। काकी+अर्थम्=काक्य्+ अर्थम्। इह 'अचः परस्मिन् पूर्वविधौ' इति यणादेशस्य स्थानिवद्भावात् 'स्कोः संयोगाद्योरन्ते च' इति संयोगादेः ककारस्य लोपो न भवति। अन्यथा संयोगादेः ककारस्य लोपः स्यात्।

वास्यर्थम्। इह 'अचः परस्मिन् पूर्वविधौ' इति यणादेशस्य स्थानिवद्भावात् 'स्कोः संयोगाद्योरन्ते च' इति संयोगादेः सकारस्य लोपो न भवति। स्थानिवद्भावनिषेधे तु संयोगादेः ककारस्य लोपः स्यात्।

तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि, क्विपः सर्वापहारिलोपे, णेर्लोपे, 'तक्ष्' 'रक्ष्' इत्यत्र 'स्कोः०' इति संयोगादिलोपे कर्तव्ये 'अचः परस्मिन् पूर्वविधौ' इति णिलोपस्य स्थानिवद्भावाद् ककारलोपो न भवति। तेन संयोगान्तलोपे तक्, तग्, रक्, रग्, इति सिध्यति। स्थानिवद्भावनिषेधे तु संयोगादेः ककारस्य लोपः स्यात्, तेन च षकारस्य जश्त्वं स्यात्।

लत्वम् – निगार्यते, निगाल्यते। निगारि+यक्+ते –'णेरनिटि' इति णिलोपे, 'अचि विभाषा' इति लत्वे–निगाल्यते। अत्र 'अचः परस्मिन् पूर्वविधौ' इति णिलोपस्य स्थानिवद्भावात्

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

'अचि विभाषा' इति लत्वं भवति। स्थानिवद्भावनिषेधे तु अच्परकत्वाभाद् लत्वं न स्यात्।

णत्वम् – माषवपनी। व्रीहिवपनी। वपतेर्ल्युट्, अनादेशः, उगित्त्वात् ङीप्, 'यस्येति च' इत्यकारलोपः। इह 'अचः परस्मिन् पूर्वविधौ' इति अकारलोपस्य स्थानिवद्भावेन नकारस्य प्रातिपदिकान्तत्वाभावात् 'प्रातिपदिकान्तनुम्विभक्तिषु च' इति प्राप्तं णत्वं न भवति।

द्विर्वचनेऽचि (पा. सू. १.१.५९)

अचः परस्मिन् इत्यतो 'अचः' इति, 'स्थानिवदादेश०' इत्यत 'आदेश' इति, 'न पदान्त०' इत्यतो 'न' इत्यनुवर्तते। द्विर्वचन इति चावर्तते। तेन द्वित्वे कर्तव्ये सति, इत्यर्थो लभ्यते। तदाह –

द्विर्वचननिमित्तेऽचि अजादेशः स्थानिवद् भवति, द्विर्वचन एव कर्तव्ये।

पा+अतुः, इत्यत्र 'आतो लोप इटि च' (६.४.६४) इत्याकारलोपे कृते, कृ+अतुः, इत्यत्र यणादेशे कृते, अनच्कत्वाद् 'एकाचो द्वे प्रथमस्य' इति द्विर्वचनं न प्राप्नोति, अतो 'अचः परस्मिन् पूर्वविधौ' इत्यनेनासिद्धे इदं सूत्रमारब्धम्।

'अचः परस्मिन् पूर्वविधौ' इत्यनेन 'योऽनादिष्टादचः पूर्वः' तस्मिन् कर्तव्ये, आदेशस्य स्थानिवत्त्वमुक्तम्। अत्र तु साच्कस्य द्विर्वचनं, न त्वचः पूर्वस्येत्यप्राप्तं स्थानिवत्त्वमनेन विधीयते। रूपातिदेशश्चायं नियतकालो वृत्तिकारानुसारेण स्वीकृतः। तेन कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते।

कौमुद्यां तु आदेशनिषेधपक्षः स्वीकृतः। फलं तूभयत्र तुल्यमेव। किन्त्वादेश-मङ्गीकृत्य पुनः स्थानिरूपाश्रयणापेक्षया निषेधपक्षे लाघवं वर्तते। निषेधपक्षेऽर्थो भवति –

द्वित्वनिमित्तेऽचि अजादेशो न स्याद्, द्वित्वे कर्तव्ये।

द्विर्वचनेऽचि इत्यनयोः सामानाधिकरण्याऽसम्भवाद् द्विर्वचनशब्देन द्विर्वचननिमित्तं लक्ष्यते। द्विरुच्यते येन परनिमित्तेन तद् द्विर्वचनम्। द्वित्वनिमित्तमिति यावद्। अचि इत्यस्य विशेषणमिदम्।

'सन्यङोः' इत्यस्य षष्ठ्यन्तत्वे सन्नन्तस्य द्वित्वविधानेऽपि सनो द्वित्वनिमित्तत्वमस्त्येव, लोके समवायिकारणातिरिक्ते निमित्तकारणव्यवहारात्। अतः ऊर्णु+इट्+सन्, इत्यत्र 'नु' इति द्वित्वस्य स्थानी। तदतिरिक्तं सर्वं निमित्तम्। अतो 'इस' इत्यस्य द्वित्वनिमित्तत्वे, तस्मिन् परतो प्राप्तयोः गुणावादेशयोरनेन निषेधो भवति।

किन्तु 'ऋ+इट्+सन्', इत्यत्रैवं न भवति। अत्र 'सार्वधातुकार्धधातुकयोः' इति गुणे कृते 'अर्+इ+स' इति जाते यो द्वितीयोऽच्, स द्वित्वस्य स्थानी, अतो न तस्मिन् निमित्तत्व-व्यवहारः संभवति – 'कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते' इति परिभाषाश्रयणात्।

आल्लोपोपधालोपणिलोपयणयवायावादेशाः प्रयोजनम्।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

आल्लोपः–पपतुः, पपुः। 'आतो लोप इटि च' इत्याकारलोपे कृतेऽनच्कत्वाद् 'एकाचो द्वे प्रथमस्य' इति द्विर्वचनं न प्राप्नोति, तच्चादेशस्य स्थानिवद्भावाद् भवति। आदेशनिषेधपक्षे तु द्वित्वकर्तव्यतायां आदेशात् प्रागेव द्वित्वं भवति।

उपधालोपः–जघ्नतुः, जघ्नुः।'गमहनजनखनघसाम्०' इत्युपधालोपे कृतेऽनच्कत्वाद् 'एकाचो द्वे प्रथमस्य' इति द्विर्वचनं न प्राप्नोति, तच्चादेशस्य स्थानिवद्भावाद् भवति। आदेशनिषेधपक्षे तु द्वित्वकर्तव्यतायां आदेशात् प्रागेव द्वित्वं भवति।

णिलोपः– आटिटत्।'अट्+णिच्+चङ्+त्' अटतेर्णिचि लुङि चङि णिलोपे कृते द्वितीयस्याचोऽभावाद्'अजादेर्द्वितीयस्य' इति द्वितीयस्यैकाचो द्विर्वचनं न प्राप्नोति, आदेशस्य स्थानिवद्भावाद् भवति। आदेशनिषेधपक्षे तु द्वित्वकर्तव्यतायां आदेशात् प्रागेव द्वित्वं भवति।

यण्–चक्रतुः, चक्रुः। करोतेरतुसि उसि च यणादेशे कृतेऽनच्कत्वाद् द्विर्वचनं न प्राप्नोति, तच्चादेशस्य स्थानिवद्भावाद् भवति। आदेशनिषेधपक्षे तु द्वित्वकर्तव्यतायां आदेशात् प्रागेव द्वित्वं भवति।

अयवायावादेशाः–निनय। निनाय। लुलव। लुलाव। नयतेर्लुनातेश्चोत्तमे णलि गुणे कृते वृद्धौ चायवायावादेशा भवन्ति।

निनाय।'णलुत्तमो वा' इति णित्त्वपक्षे 'अचो ञ्णिति' इति वृद्धौ, 'एचोऽयवायावः' इति आयादेशे – नाय्+अ, इति जाते 'आय्' इत्यादेशस्य स्थानिवद्भावाद् 'नै' इत्यस्य द्विर्वचनं भवति।

निनय। 'णलुत्तमो वा' इति णित्त्वाभावपक्षे 'सार्वधातुकार्धधातुकयोः' इति गुणे 'एचोऽयवायावः' इति अयादेशे – नय्+अ, इति जाते 'अय्' इत्यादेशस्य स्थानिवद्भावाद् 'ने' इत्यस्य द्विर्वचनं भवति।

आदेशनिषेधपक्षे तु नी+णल्, इत्यत्र द्वित्वात् प्रागादेशनिषेधे 'नी' इत्यस्यैव द्वित्वम्।

लुलाव।'णलुत्तमो वा' इति णित्त्वपक्षे 'अचो ञ्णिति' इति वृद्धौ, 'एचोऽयवायावः' इति आवादेशे – लाव्+अ, इति जाते 'आव्' इत्यादेशस्य स्थानिवद्भावाद् 'लौ' इत्यस्य द्विर्वचनं भवति।

लुलव। 'णलुत्तमो वा' इति णित्त्वाभावपक्षे 'सार्वधातुकार्धधातुकयोः' इति गुणे 'एचोऽयवायावः' इति अवादेशे – लव्+अ, इति जाते 'अव्' इत्यादेशस्य स्थानिवद्भावाद् 'लो' इत्यस्य द्विर्वचनं भवति।

आदेशनिषेधपक्षे तु लू+णल्, इत्यत्र द्वित्वात् प्रागादेशनिषेधे 'लू' इत्यस्यैव द्वित्वम्।

द्विर्वचने कर्तव्ये इति किम् ? कालावधिपरिग्रहार्थं द्विर्वचनग्रहणम्।

जग्ले। मम्ले। जग्ला+ए, मम्ला+ए, इत्यत्र 'आतो लोप इटि च' इत्याकारलोपस्य स्थानिवद्भावो न भवति, द्वित्वकर्तव्याभावात्।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

यदि कालावधिपरिग्रहार्थं द्विर्वचनग्रहणं न क्रियेत, तदा आदेशोत्तरकालेऽपि स्थानिरूपं प्रसज्येत, ततश्चाकारस्य श्रवणमेव स्यात्, श्रूयमाणे चाकारे परेण सह वृद्धिः प्रसज्येत।

द्विर्वचननिमित्त इति किम् ? दुद्यूषति। दिव्धातोः सनि, द्वित्वात् परत्वादूठि कृते द्वित्वात् प्राग्यण् भवत्येव। तथा च 'द्यू' इत्यस्य द्वित्वे दुद्यूषति इति सिध्यति। ऊठि द्वित्वनिमित्तत्वाभावाद् ऊठि परतो यो यणादेशः तस्य द्वित्वे कर्तव्ये स्थानिवत्त्वं न भवति, अन्यथा दिद्यूषति इत्यनिष्टं रूपं प्रसज्येत।

अचीति किम्? जेघ्रीयते। देध्मीयते। अत्र घ्राधातोर्यङि द्वित्वात् प्राग् 'ई घ्राध्मोः' इत्यनेन आकारस्य स्थाने ईकारादेशो भवति। स च ईकारादेशः अज्निमित्तकत्वाभावाद् द्वित्वे कर्तव्ये स्थानिवन्न भवति, तेनाकारस्य द्वित्वं न भवति।

अचः इति किम् ? असूषुपत्। इह 'स्वापेश्चङि' इति वकारस्य सम्प्रसारणं द्वित्वे कर्तव्ये स्थानिवन्न भवति, तस्याजादेशत्वाभावात्। ततश्च कृते सम्प्रसारणे 'सुप्' इत्यस्य द्वित्वेऽभ्यासे उकारस्य श्रवणं संभवति।

प्रत्ययलोपे प्रत्ययलक्षणम् (पा. सू. १.१.६२)

प्रत्ययो लक्षणं निमित्तं यस्य तत् प्रत्ययलक्षणम्। **प्रत्ययलोपे प्रत्ययनिमित्तं कार्यं भवति।** असत्यपि प्रत्यये कथं नु प्रत्ययनिमित्तं कार्यं स्यादिति कार्यातिदेशोऽयमारभ्यते।

पाणिनीयव्याकरणे प्रसक्तस्य यददर्शनं भवति, तस्य चतस्रः संज्ञा भवन्ति। 'तस्य लोपः' 'घोर्लोपो लेटि वा' 'लोपो व्योर्वलि' 'श्नान्नलोपः' 'अल्लोपोऽनः' 'ढे लोपोऽकद्र्वाः' इत्यादिषु सूत्रेषु लोपशब्देन प्रसक्तस्य यददर्शनं विधीयते, तस्य अदर्शनस्य 'अदर्शनं लोपः' इत्यनेन सूत्रेण लोप इतीयं संज्ञा भवति। अर्थस्येयं संज्ञा न शब्दस्य।

पुनश्च 'प्रत्ययस्य लुक्श्लुलुपः' इति सूत्रेण लुक्संज्ञाभावितं प्रत्ययस्यादर्शनं लुक्संज्ञं भवति, श्लुसंज्ञाभावितं प्रत्ययादर्शनं श्लुसंज्ञं भवति, लुप्संज्ञाभावितं प्रत्ययादर्शनं लुप्संज्ञं भवति। तेन संज्ञानां संकरो न भवति।

विशेषविहिता अपि लुगादिसंज्ञा लोपसंज्ञां न बाधन्ते, एकसंज्ञाधिकारादन्यत्र संज्ञानां बाध्यबाधकभावानङ्गीकाराद्। अतो लुक्श्लुलुपां लोपसंज्ञा स्थिरैव भवति। अतो राजपुरुष इत्यत्र प्रत्ययलक्षणेन राजन् इत्यस्य पदसंज्ञा भवति, तेन च नलोपः प्रातिपदिकान्तस्येति नलोपो भवति।

इदानीं प्रत्ययलोपे सति प्रत्ययनिमित्तं कार्यमुदाह्रियते –

सोमसुत्, अग्निचित्। सोम+सु+क्विप्, अनुबन्धकार्ये, क्विप्प्रत्ययस्य सर्वापहारि-लोपे प्रत्ययलक्षणेन 'ह्रस्वस्य पिति कृति तुग्' इति तुगागमो भवति।

सोमसुत्, अग्निचित्। सोमसुत्+सु, अग्निचित्+सु, इत्यत्र 'हल्ङ्याब्भ्यो दीर्घाद्

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

सुतिस्यपृक्तं हल्' इत्यपृक्तसुलोपे, 'सुप्तिङन्तं पदम्' इत्यनेनाप्राप्ता पदसंज्ञा प्रत्ययलक्षणेन भवति।

अधोग् । अधोक्+त्, अत्र अपृक्ततिलोपे 'सुप्तिङन्तं पदम्' इत्यनेनाप्राप्ता पदसंज्ञा प्रत्ययलक्षणेन भवति।

गोमान्, यवमान्। गोमत्+सु, अत्रान्तरङ्गत्वाद् 'हल्ङ्याब्भ्यो दीर्घाद् सुतिस्यपृक्तं हल्' इति अपृक्तलोपे 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यप्राप्तो नुमागमः प्रत्ययलक्षणेन भवति।

राजपुरुषः। षष्ठीसमासः। राजन्+ङस्+पुरुष+सु, इत्यत्र 'सुपो धातुप्रातिपदिकयोः' इति सुब्लुकि सति, ङस्प्रत्ययमाश्रित्य 'सुप्तिङन्तं पदम्' इत्यनेनाप्राप्ता पदसंज्ञा प्रत्यय-लक्षणेन भवति। तेन च 'नलोपः प्रातिपदिकान्तस्य' इति नलोपो भवति।

अत्र ध्येयम् - सति प्रत्यये यत्प्राप्नोति, तदेव प्रत्ययलक्षणं लुप्तेऽपि भवति। लोपोत्तरकालं यत् प्राप्नोति तत् प्रत्ययलक्षणं न भवति। यथा -

ग्रामणिकुलम्, सेनानिकुलम्। ग्रामं नयति इति ग्रामणीः (ग्राम+नी+क्विप्)। अत्र क्विप्प्रत्यये सति 'ह्रस्वस्य पिति कृति तुग्' इति तुग् न प्राप्नोति, ईकारस्य दीर्घत्वाद् । अतो ग्रामण्याः कुलं ग्रामणिकुलम् इत्यत्र 'इको ह्रस्वोऽङ्यो गालवस्य' इत्यनेन ईकारस्य औत्तरपदिके ह्रस्वत्वे कृतेऽपि स तुगागमो न भवति।

ननु च स्थानिवद्भावादेव प्रत्ययनिमित्ते कार्ये सिद्धे किमनेन सूत्रेण ? उच्यते-

१. अनल्विधौ इति प्रतिषेधात् स्थानिवत्सूत्रमलाश्रये न प्रवर्तते। इदं तु अल्विधावपि विध्यर्थं भवति। तथाहि - अतृणेट्। अ+तृणह्+त्। अन्तरङ्गत्वाद् हल्ङ्यादिलोपे अतृणह्। अत्र प्रत्यये लुप्ते, हलि पिति सार्वधातुके 'तृणह इम्' इति विहित इमागमः स्थानिवद्भावेन न प्राप्नोति, 'हलि' इत्यलाश्रयत्वात्। स चानेन प्रत्ययलक्षणेन भवति।

यस्मिन्नल्विधौ प्रत्ययः प्राधान्येनाश्रीयते तस्मिन्नेवाल्विधौ इदं विध्यर्थं भवति। 'तृणह इम् हलि पिति सार्वधातुके' इत्यत्र प्रत्ययः प्रधानः, हलि इति विशेषणम्।

२. स्थानिवत्सूत्रेण सिद्धे नियमार्थमिदं भवति। यस्मिन् कार्ये कर्तव्ये प्रत्ययस्या-साधारणं रूपं प्रयोजकं भवति, तदेव कार्यं प्रत्ययलोपे सति प्रत्ययलक्षणेन भवति। तेन सोमसुत्, अग्निचित्, इत्यत्र सोर्लोपे सति प्रत्ययलक्षणेन सुप्तिङन्तं पदमित्यनेन पदसंज्ञा भवति। अधोग् इत्यत्र तिलोपे सति प्रत्ययलक्षणेन सुप्तिङन्तं पदमित्यनेन पदसंज्ञा भवति।

यस्मिन् कार्ये कर्तव्ये शब्दस्य प्रत्ययाप्रत्ययसाधारणं रूपं प्रयोजकं भवति, तत्कार्यं प्रत्ययलक्षणेन न भवति। तेन शोभना दृषदो यस्य सुदृषत्प्रासादः, इत्यत्र समासत्वात् 'सु+दृषत्+जस्' इत्यस्य प्रातिपदिकसंज्ञायां सुब्लुकि, सुदृषत्, इति बहुव्रीहिसमासः। अस्मात् सौ 'सुदृषत्+स्', इत्यत्र लुप्तं जस्प्रत्ययमाश्रित्य 'सुदृषद्जस्+स्' इत्यसन्तं प्रातिपदिकं

TRIAL MODE - a valid license will remove this message. See the keywords property of this PDF for more information.

भवति। तस्योपधाया 'अत्वसन्तस्य चाधातोः' इति सौ दीर्घः प्राप्नोति। किन्तु 'अत्वसन्तस्य चाधातोः' इत्यस्मिन् सूत्रे असन्त इति प्रत्ययाप्रत्ययसाधारणो गृह्यते। तेन सुदृषत्+सु, इत्यत्र लुप्तं जस्प्रत्ययमाश्रित्य सौ दीर्घे कर्तव्ये प्रत्ययलक्षणं न भवति।

एवं सुदृषद् इत्यत्र बहुव्रीहिसमासे लुप्तं जस्प्रत्ययमाश्रित्य असन्तत्वात् 'सोर्मनसी अलोमोषसी' इति प्राप्तमुत्तरपदादाद्युदात्तत्वमपि न भवति, 'सोर्मनसी अलोमोषसी' इति सूत्रे प्रत्ययाप्रत्ययसाधारणस्य मन्नन्तस्य असन्तस्य स्वीकारात्।

यद्यपीदं पक्षद्वयं भाष्य उक्तं, तथापि मनोरमायां नियमपक्ष एव प्रबल इति।

प्रत्ययलक्षणमिति किम्? यत्र प्रत्यय एव निमित्तत्वेनाश्रीयते तत्रैव भवति प्रत्ययलक्षणम्। यत्र निमित्तत्वेन वर्ण आश्रीयते तत्र न भवति प्रत्ययलक्षणम् –

वर्णाश्रये नास्ति प्रत्ययलक्षणम् – रैकुलम्। षष्ठीसमासः। रै+ङस्+कुल+सु, इत्यत्र 'सुपो धातुप्रातिपदिकयोः' इति सुब्लुकि सति, ङस्प्रत्ययमाश्रित्य 'एचोऽयवायावः' इति आयादेशो न भवति, वर्णाश्रयत्वात्। आयादेशस्य निमित्तं वर्णः, न तु प्रत्ययः।

गोहितम्। चतुर्थीसमासः। गो+ङे+हित+सु, इत्यत्र ङेप्रत्ययमाश्रित्य 'एचोऽयवायावः' इति अवादेशो न भवति, वर्णाश्रयत्वात्। अवादेशस्य च निमित्तं वर्णः, न तु प्रत्ययः।

ननु च नात्र प्रत्ययस्य लोपः क्रियते, किं तर्हि ? लुक्। नैतदस्ति। लोपशब्दोऽपि सामान्येन तद्भावितस्य, अतद्भावितस्य चादर्शनस्य संज्ञा भवति। तस्माद् लुगपि लोप एव।

प्ररि कुलम्। प्रकृष्टो राः धनं यस्य इति प्ररै। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वे 'प्ररि कुलम्'। प्ररि इतिशब्दस्तु एकदेशविकृतमनन्यत्वात् प्ररै एव। अस्मात् सुविभक्तौ, 'स्वमोर्नपुंसकात् (७.१.२३)' इति सुलोपे, लुप्तं सुप्रत्ययमाश्रित्य 'रायो हलि (७.२.८५)' इत्यात्त्वं न भवति, वर्णाश्रयत्वात्।

प्रत्ययस्य इत्यनुवृत्त्या सिद्धे पुनः प्रत्ययग्रहणं किम् ? कृत्स्नप्रत्ययलोपे यथा स्यात्। अवयवलोपे मा भूत् – आघ्नीय, सङ्ग्मीय इति। हनिगम्योर्लिङ्यात्मनेपदे 'लिङः सलोपोऽनन्त्यस्य' इति सीयुट्प्रत्ययस्य सकारलोपः प्रत्ययैकदेशलोपः, न तु कृत्स्नप्रत्ययलोपः। अतोऽत्र प्रत्ययलक्षणेन 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इत्यनुनासिकलोपो न भवति।

न लुमताङ्गस्य (पा. सू. १.१.६३)

प्रत्ययलोपे प्रत्ययलक्षणमित्यनुवर्तते। लुक्, श्लु, लुप्, एते लुमन्तः। लु इत्येकदेशोऽस्यास्तीति लुमान् लुशब्दः, श्लुशब्दः, लुप्शब्दश्च। तेन **लुमता शब्देन प्रत्ययलोपे सति प्रत्ययनिमित्तमङ्गकार्यं न भवति।** पूर्वेणातिप्रसक्तस्य प्रत्ययलक्षणस्य विशेषे प्रतिषेध उच्यते।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

लुप्तप्रत्यये परतः प्रत्ययस्य प्रकृतिभूतं यदङ्गं, तदुद्देश्यकं यत् किमपि कार्यम् आङ्गम् अनाङ्गं वा, सत्सर्वं न भवतीत्यर्थः।

गर्गाः। गर्ग+यञ्+जस् – 'यञिञोश्च' इति यञो लुकि, तन्निमित्तमङ्गकार्यं वृद्धिर्न भवति।

जुहुतः। शपो लुमता लुप्ते तन्निमित्तमङ्गकार्यं गुणो न भवति।

मृष्टः। शपो लुमता लुप्ते तन्निमित्तमङ्गकार्यं वृद्धिर्न भवति।

कति। 'षड्भ्यो लुक्' इति जसो लुकि, तन्निमित्तमङ्गकार्यं 'जसि च' इति गुणो न भवति।

दादा। दा+यङ्, अत्र यङो लुकि, तन्निमित्तमङ्गकार्यं 'घुमास्था०' इति ईत्वं न भवति।

जाघ्रा। घ्रा+यङ्, अत्र यङो लुकि, तन्निमित्तमङ्गकार्यं 'ई घ्राध्मोः' इति ईत्वं न भवति।

शेशी। शी+यङ्, अत्र यङो लुकि, तन्निमित्तमङ्गकार्यं 'अयङ् यि क्ङिति' इति अयङ् न भवति।

जाग्रह्। पाप्रच्छ्। ग्रह्+यङ्, प्रच्छ्+यङ्, अत्र यङो लुकि, तन्निमित्तमङ्गकार्यं 'ग्रहिज्या०' इति सम्प्रसारणं न भवति।

अङ्गस्य इति किम्? यत् कार्यम् अङ्गोद्देश्यकं भवति, तत् कार्यं लुमता शब्देन प्रत्यये लुप्ते प्रत्ययलक्षणेन न भवति। यत् कार्यम् अङ्गोद्देश्यकं न भवति, तत् कार्यं लुमता शब्देन प्रत्यये लुप्ते प्रत्ययलक्षणेन भवति।

पञ्च। सप्त। पयः। साम। इत्यादौ 'षड्भ्यो लुक्' इति जश्शसोर्लुका लुप्तेऽपि 'सुप्तिङन्तं पदम्' इति पदसंज्ञा अङ्गोद्देश्यकत्वाभावाद् भवति, ततश्च 'नलोपः प्रातिपदिकान्तस्य' इति नलोपो भवति।

दे+यङ् इत्यत्र यङो लुकि 'आदेच उपदेशेऽशिति' इत्यात्त्वं अङ्गोद्देश्यकत्वाभावात् भवति। तेन च 'दादा' इति यङ्लुगन्तो धातुर्निष्पद्यते।

राजन्+ङस्+पुरुष+सु, इत्यत्र 'सुपो धातुप्रातिपदिकयोः' इति सुब्लुकि सति, ङस्प्रत्ययमाश्रित्य कार्यद्वयं प्राप्नोति। 'राजन्' इत्यस्य भसंज्ञा प्राप्नोति, 'राजन्+ङस्' इत्यस्य च पदसंज्ञा प्राप्नोति।

तत्र 'यचि भम्' इति भसंज्ञाया अङ्गोद्देश्यकत्वात् लुप्तं ङस्प्रत्ययमाश्रित्य 'न लुमताङ्गस्य' इति निषेधो भवति, तेन 'अल्लोपोऽनः' इति अल्लोपो न भवति।

'सुप्तिङन्तं पदम्' इति पदसंज्ञाया अङ्गोद्देश्यकत्वाभावात्, 'न लुमताङ्गस्य' इति निषेधो न भवति, तेन प्रत्ययलक्षणेन पदसंज्ञा भवति। तेन च 'नलोपः प्रातिपदिकान्तस्य' इति नलोपो भवति। अतोऽङ्गस्येत्युक्तम्।

लुमतेति किम्? कार्यते। हार्यते।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

विप्रतिषेधे परं कार्यम् (पा. सू. १.१.५८)

विप्रतिषेधशब्देन तुल्यबलविरोधोऽत्र गृह्यते। अन्यत्रान्यत्र लब्धावकाशत्वे सत्येकत्र समवेतत्वं तुल्यबलविरोधत्वम्। तुल्यबलविरोधे सति परं कार्यं भवति।

वृक्षेभ्यः, प्लक्षेभ्यः। अत्र 'वृक्ष+भ्यस्' 'प्लक्ष+भ्यस्' इत्यवस्थायां 'सुपि च (पा. सू. ७.३.१०२)' इत्यनेन दीर्घः प्राप्तः। 'बहुवचने झल्येत् (पा. सू. ७.३.१०३)' इत्यनेन एत्वं च प्राप्तम्। विप्रतिषेधसूत्रसाहाय्येन परत्वादेत्वं भवति। यतः 'वृक्ष+भ्याम्=वृक्षाभ्याम्', इत्यत्र 'सुपि च (पा. सू. ७.२.१०२)' इति चरितार्थम्। 'वृक्ष +सु=वृक्षेषु' इत्यत्र 'बहुवचने झल्येत् (पा. सू. ७.२.१०३)' इति चरितार्थम्। वृक्षेभ्यः इत्यत्रोभयं प्राप्नोति। विप्रतिषेधेन एत्त्वं भवति।

'विप्रतिषेधे परं कार्यम्' (१.४.२) इत्येषा परिभाषा त्रिपाद्यां नोपतिष्ठते। यद्युपतिष्ठेत, तत्र को दोषः ? 'स्फुर स्फुल सञ्चलने' 'गुरी उद्यमने' आभ्याम् 'ऋहलोर्ण्यत्' इति ण्यति 'पुगन्तलघूपधस्य च (७.३.८६)' इति सपादिशास्त्रेण प्राप्तं गुणं बाधित्वा परत्वाद् 'हलि च' (८.२.७७) इति त्रिपादिशास्त्रेण दीर्घो भवेत्। तेन विस्फोर्यम्, अवगोर्यम् इति न सिध्येत्। अत उच्यते – **पूर्वत्रासिद्धे नास्ति विप्रतिषेधोभावादुत्तरस्य।**

उत्सर्गापवादनित्यान्तरङ्गबहिरङ्गेषु तुल्यबलता नास्ति।

उत्सर्गापवादयोरपवादो बलीयान् – 'निरवकाशो विधिरपवादः' इति नियमानुरोधेनापवादो निरवकाशो भवति। अतोऽपवादस्यान्यत्र चरितार्थत्वाभावादुत्सर्गापवादयोस्तुल्यबलता न भवति। यथा 'आद्गुणः (६.१.८६)' 'वृद्धिरेचि (६.१.८९)'। अत्र 'आद्गुणः (६.१.८६)' इत्युत्सर्गसूत्रम्। 'वृद्धिरेचि (६.१.८७)' इति तस्यापवादभूतम्। अत्र – अवर्णादचि 'आद्गुणः (६.१.८६)' इति गुणो भवति। अवर्णादेचि 'वृद्धिरेचि (६.१.८७)' इति वृद्धिर्भवति। एचि तु अचि इत्यस्यैवान्तर्भूतो वर्तते। यद्यवर्णादेच्यपि गुणो भवेत्, तदा 'वृद्धिरेचि (६.१.८७)' इति निरवकाशः स्यात्। अस्य कृते कुत्रापि स्थानं न लभ्येत। अतोऽन्यत्र कुत्रापि 'वृद्धिरेचि (६.१.८७)' इत्यस्य सावकाशत्वाभावादुत्सर्गापवादयोर्नास्ति तुल्यबलता।

नित्यानित्ययोर्नित्यो बलीयान् – तुदति। अत्र 'तुद्+ति' इत्यवस्थायां 'तुदादिभ्यः शः (३.१.७७)' इति सूत्रेण शः प्राप्तः। 'पुगन्तलघूपधस्य च (७.३.८६)' इति सूत्रेण चोपधागुणः प्राप्तः। यद्यपि गुणविधायकं सूत्रं परं, शविकरणविधायकं सूत्रं पूर्वम्। किन्तु परत्वाद् गुणे कृतेऽपि 'एकदेशविकृतमनन्यव'दितिन्यायेन शविकरणः प्राप्नोत्येव। यो विधिः कृतेऽपि प्राप्नोति, अकृतेऽपि प्राप्नोति, स '**कृताकृतप्रसङ्गिविधिर्नित्यो**' भवति। कृताकृतप्रसङ्गित्वेन शविकरणो नित्यः। शविकरणे सति गुणो न प्राप्नोति, अतो गुणोऽनित्यः। नित्येन शविकरणेनानित्यो गुणो बाध्यते।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः - अन्तः=अन्तर्भूतम् अङ्गम्=निमित्तं यस्य तदन्तरङ्गम्। बहिर्भूतम् अङ्गम्=निमित्तं यस्य तद् बहिरङ्गम्। **असिद्धं बहिरङ्गमन्तरङ्गे** इति परिभाषयान्तरङ्गे कर्तव्ये बहिरङ्गस्यासिद्धत्वं भवति। यथा - पचावेदम्। अत्र 'पचाव इदम्' इत्यवस्थायाम् 'आद्गुणः (६.१.८६)' इति सूत्रेण गुणे कृते 'पचावेदम्' इत्यत्र 'अन्तादिवच्च (६.१.८४)' इति सूत्रेण पूर्वान्तवद्भावेन लोट्त्वमादाय 'एत ऐ (३.४.९३)' इति सूत्रेण एकारस्य ऐकारः प्राप्नोति। किन्तु 'आद्गुणः (६.१.८६)' इति सूत्रेण विहितो गुणः पदद्वयसम्बन्धिवर्णद्वयनिमित्तकत्वेन बहिरङ्गो भवति। एकमात्रापेक्षत्वात् 'एत ऐ (३.४.९३)' इति सूत्रमन्तरङ्गं भवति। अतः 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया बहिरङ्गस्य गुणस्यासिद्धत्वात् 'पचावेदम्' इत्यत्र एकाराभावादैकारो न भवति। अतो बहिरङ्गस्याभावान्न तुल्यबलता।

'विप्रतिषेधे परं कार्यम् (१.४.२)' इति सूत्र इष्टवाचिनं परशब्दमङ्गीकृत्य विप्रतिषेधे यत् परम्=इष्टं, तद् भवतीत्यर्थेन लक्ष्यानुरोधाद् पूर्वस्यापि बलीयस्त्वमङ्गीकर्तव्यम्। तत्र पूर्वविप्रतिषेधेन नुमो बलीयस्त्वं भवति।

तथा चोक्तम् - **वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम्भवति पूर्वविप्रतिषेधेन।**

वृद्धेर्नुम् बलीयान् - अतिसखीनि। अत्र 'अतिसखि इ' इत्यवस्थायां 'सख्युरसम्बुद्धौ (७.२.११५)' इति सूत्रेण परत्वाद् वृद्धिः प्राप्नोति। 'इकोऽचि विभक्तौ (७.१.७३)' इत्यनेन नुम् च प्राप्नोति। किं भवेत् ? **वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम् भवति पूर्वविप्रतिषेधेन।** तत्र 'गावौ सखायौ' इत्यादौ वृद्धेरवकाशः। 'वारीणि' इत्यत्र च नुमोऽवकाश इत्यन्यत्रान्यत्र लब्धावकाशत्वमप्यत्र बोध्यम्।

औत्त्वान्नुम् बलीयान् - वारीणि। अत्र 'वारि ङि' इत्यवस्थायाम् 'अच्च घेः (७.१.११९)' इति सूत्रेण ङि इत्यस्य स्थाने परत्वादौत्त्वं प्राप्तम्। 'इकोऽचि विभक्तौ (७.१.७३)' इत्यनेन नुमागमश्च प्राप्तः। किं भवेत् ? **वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम् भवति पूर्वविप्रतिषेधेन।** तत्र हरौ इत्यत्र औत्त्वं सावकाशम्। वारीणि इत्यत्र च नुमागमः सावकाश इत्यन्यत्रान्यत्र लब्धावकाशत्वमप्यत्र बोध्यम्।

तृज्वद्भावान्नुम् बलीयान् - प्रियक्रोष्टूनि। प्रियः क्रोष्टा येषां तानि प्रियक्रोष्टूनीति विग्रहे 'प्रिय क्रोष्टु इ' इत्यवस्थायां 'तृज्वत्क्रोष्टुः (७.१.९५)' इति सूत्रेण परत्वात् तृज्वत्त्वं प्राप्तोति। 'इकोऽचि विभक्तौ (७.१.७३)' इत्यनेन नुम् च प्राप्नोति। किं भवेत् ? **वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम् भवति पूर्वविप्रतिषेधेन।** तत्र 'क्रोष्टा' इत्यत्र तृज्वद्भावस्यावकाशः। 'वारीणि' इत्यत्र नुमागमस्यावकाश, इत्यन्यत्रान्यत्र लब्धावकाशत्वमप्यत्र बोध्यम्।

गुणान्नुम् बलीयान् -वारिणे। अत्र 'वारि ङे' इत्यवस्थायां 'घेर्ङिति (७.३.१११)'

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

इति सूत्रेण परत्वादिकारस्य गुणः प्राप्तः। 'इकोऽचि विभक्तौ (७.१.७३)' इत्यनेन नुमागमश्च प्राप्तः। किं भवेत् ? **वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम् भवति पूर्वविप्रतिषेधेन।** तत्र हरये इत्यत्र गुणः सावकाशः। 'वारीणि' इत्यत्र च नुमागमः सावकाश इत्यन्यत्रान्यत्र लब्धावकाशत्वमप्यत्र बोध्यम्।

एवमेव पूर्वविप्रतिषेधेन नुटोऽपि बलीयस्त्वं प्रतिपादितम्। तथा चोक्तम् –

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन –

नुमो नुड् बलीयान् – वारीणाम्। अत्र 'वारि आम्' इत्यवस्थायां 'ह्रस्वनद्यापो नुट् (७.१.५४)' इति सूत्रेणामो नुडागमः प्राप्तः। 'इकोऽचि विभक्तौ (७.१.७३)' इत्यनेन नुमागमश्च प्राप्तः। किं भवेत् ? **नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन** इति पूर्वविप्रतिषेधेन नुडेव भवति। तत्र रामाणाम् इत्यादौ नुडागमः सावकाशः। 'वारीणि' इत्यत्र च नुमागमः सावकाश इत्यन्यत्रान्यत्र लब्धावकाशत्वमप्यत्र बोध्यम्।

ननु नुम्नुटोर्नकार एवावशिष्यते, तर्हि कस्तावन्नुम्नुटोर्विशेष इति जिज्ञासायामुच्यते – नुमागम इकारान्तस्याङ्गस्य भवति। नुडागम 'आम्' इति प्रत्ययस्येत्येवं नुटि कृते सत्येव 'नामि (६.४.)' इति सूत्रेण दीर्घो भविष्यति। नुमि कृते 'नामि (७.१.७३)' इत्यस्याप्रवृत्ताविष्टो दीर्घो न स्यादिति नुम्नुटोर्विशेषः।

अचि रान्नुड् बलीयान् – 'अचि र' इत्यनेन 'अचि र ऋतः (७.२.२००)' इति सूत्रं विवक्षितम्। तिसृणाम्। अत्र 'तिसृ आम्' इत्यवस्थायां 'ह्रस्वनद्यापो नुट् (७.१.५४)' इति सूत्रेणामो नुडागमः प्राप्तः। 'अचि र ऋतः' इत्यनेन परत्वाद् रत्वं च प्राप्तम्। **नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन** इति पूर्वविप्रतिषेधेन नुडेव भवति। तत्र रामाणाम् इत्यादौ नुडागमः सावकाशः। 'तिस्रः' इत्यत्र रत्वं च सावकाशम्, इत्यन्यत्रान्यत्र लब्धावकाशत्वमप्यत्र बोध्यम्।

तृज्वद्भावान्नुड् बलीयान् – क्रोष्टूनाम्। अत्र 'क्रोष्टु आम्' इत्यवस्थायां 'ह्रस्वनद्यापो नुट् (७.१.५४)' इति सूत्रेणामो नुडागमः प्राप्तः। 'तृज्वत्क्रोष्टुः (७.१.९५)' इति सूत्रेण परत्वात् तृज्वत्त्वं प्राप्तम्। **नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन** इति पूर्वविप्रतिषेधेन नुडेव भवति। तत्र रामाणाम् इत्यादौ नुडागमः सावकाशः। 'क्रोष्ट्रा' इत्यत्र तृज्वद्भावः सावकाश, इत्यन्यत्रान्यत्र लब्धावकाशत्वमप्यत्र बोध्यम्।

विशेषः – इत्थञ्च सुस्पष्टमिदं यल्लक्ष्यानुरोधात् क्वचित् पूर्वविप्रतिषेधेन बलीयस्त्वं, क्वचिच्च परविप्रतिषेधेन बलीयस्त्वमङ्गीकर्तव्यम्। इदं सूत्रं सपादसप्ताध्याय्यामेव प्रवर्तते। तथा चोक्तम् – **पूर्वत्रासिद्धे नास्ति विप्रतिषेधोभावादुत्तरस्य।**

ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन (वार्तिकम्) – अत्र विवेकः – **इयङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन णिलोपो भवति।**–

इयङ्–अततक्षत्। 'तक्षू तनूकरण' इत्यस्माद्धातोर्णिचि धातुसंज्ञायां लुङि चङि,

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

'अट् तक्ष् इ अ त' इत्यत्र 'णेरनिटि' इति णिलोपः प्राप्नोति, 'अच श्नुधातुभ्रुवाम्०' इति इयङ्ङादेशः प्राप्नोति, 'चङि' इति द्वित्वं प्राप्नोति। परमपि इयङ्ङादेशं बाधित्वा पूर्वविप्रतिषेधेन पूर्वो णिलोपो भवति।

यण्–अचीकमत। 'कमु कान्तौ' इत्यस्माद्धातोः कमेर्णिङि धातुसंज्ञायां लुङि चङि, 'अट् कम् इ अ त' इत्यत्र 'अत उपधायाः' इति वृद्धिः प्राप्नोति, 'चङि' इत्यनेन द्वित्वं प्राप्नोति, 'णेरनिटि' इति णिलोपः प्राप्नोति, 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणादेशः प्राप्नोति, परमपि यणादेशं बाधित्वा पूर्वविप्रतिषेधेन पूर्वो णिलोपो भवति।

यण्–आटिटत्। 'अट' इत्यस्माद्धातोः णिचि धातुसंज्ञायां लुङि चङि, णिति प्रत्यये 'अत उपधायाः' इति वृद्धौ 'आडजादीनाम्' इत्याडागमे 'आट् आट् इ अ त्' इत्यत्र 'चङि' इति द्वित्वात् प्रागुपधाह्रस्वत्वे 'आ अट् इ अ त', द्वितीयावयवैकाचः 'टि' इत्यस्य द्वित्वे 'आ अटिटि अ त्' इत्यत्र 'णेरनिटि' इति णिलोपः प्राप्नोति, 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणादेशः प्राप्नोति, परमपि यणादेशं बाधित्वा पूर्वविप्रतिषेधेन पूर्वो णिलोपो भवति।

गुणः–कारणा। 'डुकृञ् करणे' इत्यस्माद्धातोः णिचि धातुसंज्ञायां 'ण्यासश्रन्थो युच्' इति युचि, अनादेशे 'कारि+अन', इत्यत्र 'सार्वधातुकार्धधातुकयोः' इति प्राप्तं गुणं बाधित्वा पूर्वविप्रतिषेधेन पूर्वो णिलोपो भवति। स्त्रीत्वात् टापि कारणेति रूपम्।

वृद्धिः–कारकः। 'डुकृञ् करणे' इत्यस्माद्धातोः णिचि धातुसंज्ञायां 'ण्वुल्तृचौ' इति ण्वुलि, अकादेशे कारि+अक, इत्यत्र 'अचो ञ्णिति' इति प्राप्तां वृद्धिं बाधित्वा पूर्वविप्रतिषेधेन पूर्वो णिलोपो भवति।

वृद्धिः–लौः, पौः। 'लूञ् छेदने' इत्यस्माद् णिजन्ताद्धातोः क्विपि सर्वापहारिलोपे, 'लू+णिच्+क्विप्' इत्यत्र 'अचो ञ्णिति' इति प्राप्तां वृद्धिं बाधित्वा पूर्वविप्रतिषेधेन पूर्वो णिलोपो भवति। वृद्धिश्च प्रत्ययलक्षणेन भवति, आवादेशस्तु प्रत्ययलक्षणेन न भवति 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' इति – लौः। एवं पौः।

ननु सर्वत्र निरवकाशत्वात् 'णेरनिटि' इति णिलोप एव भवतु, व्यर्थं वार्तिकमिति न। ण्यन्तात् पच्धातोः क्तिचि – पाचि+ति, इत्यत्र, 'तितुत्रतथसिसुसरकसुषु च' इति तिप्रत्यय-स्यानिट्त्वात् 'णेरनिटि' इति सावकाशः। वस्तुतस्तु अनिटि इति वचनसामर्थ्याद् आर्धधातुका-धिकारे पठितत्वाच्चार्धधातुकमात्रमस्य विषयः। तथा चेयङादेरपवाद एवायम्।

वृद्धिदीर्घाभ्यां पूर्वविप्रतिषेधेन अल्लोपो भवति –

चिकीर्षकः, चिकीर्ष्यात्। चिकीर्ष+ण्वुल्, इत्यत्र 'अचो ञ्णिति' इति वृद्धिः प्राप्नोति, चिकीर्ष्यादित्यत्र 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घः प्राप्नोति। उभयं बाधित्वा पूर्वविप्रतिषेधेन 'अतो लोपः' इति अल्लोपो भवति।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

पूर्वत्रासिद्धम् (पा. सू. ८.२.१)

सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा भवति, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं भवति। सिद्धकार्यं न करोतीत्यर्थः।

पाणिनीयाष्टाध्याय्यामष्टौ अध्यायाः सन्ति। इदमष्टाध्याय्या अष्टमाध्यायस्य द्वितीय-पादस्यादिमं सूत्रम्। इतः प्राग् अष्टाध्याय्याः सप्त अध्यायाः, अष्टमाध्यायस्य च प्रथमः पादः। अस्य सूत्रजालस्य सपादसप्ताध्यायीति संज्ञा वर्तते। इत उपरितनम् अष्टमाध्यायस्य द्वितीयतृतीयचतुर्थपादाः सन्ति। एषां त्रयाणां पादानां त्रिपादीति संज्ञा वर्तते।

एषा त्रिपादी सपादसप्ताध्यायीं प्रति असिद्धा भवति। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं भवति।

यदीदं सूत्रं परिभाषा स्यात्, तदा सर्वस्यामष्टाध्याय्यां पूर्वस्मिन्नुत्तरमसिद्धं स्यात्। ततश्च 'अतो भिस ऐस्' इत्यत्र त्यादाद्यत्वस्यासिद्धत्वात् तैः,यैः, इत्यत्र ऐस्भावो न स्यात्।

यदिदं सूत्रं स्वतन्त्रविधिसूत्रं स्यात्, तदा इतः पूर्वस्मिन् शास्त्रे प्रवर्तमाने उपरितन-शास्त्रमसिद्धं स्यादित्येवार्थो लभ्येत। ततश्च सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धेत्येवार्थो पर्यवस्येत्। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यादित्यर्थो न लभ्येत। तथा सति –

'किमु उक्तं, किम्वुक्तम्' इत्यत्र 'मय उञो वो वा' इत्यनेन उकारस्य स्थाने वकारादेशे सति प्राप्तं 'मोऽनुस्वारः' इति पूर्वत्रिपादिशास्त्रं प्रति परशास्त्रं वत्वं नासिद्धं स्यात्। तेन मकारस्य स्थानेऽनुस्वारः प्रसज्येत।

प्रशान् इत्यत्र 'मो नो धातोः' इत्यनेन मकारस्य स्थाने नकारस्य सिद्धत्वात् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः स्यात्। तथा अनड्वान् इत्यत्रापि संयोगान्तलोपस्य सिद्धत्वान्नलोपः स्यात्। अतः स्वरितत्वेनाधिकारोऽयम्। अधिकारत्वे फलमाह–

गोधुङ्मान्। गां दोग्धि इति दुहेः क्विप्, तदन्तात् गोदुहोऽस्य सन्तीति मतुपि, पदसंज्ञायां गोदुह्+मत् इत्यत्र जश्त्वापवादत्वाद् 'दादेर्धातोर्घः' इति घत्वे कृते 'झयः' इत्यनेन मकारस्य स्थाने वकारः प्रसज्येत। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यादित्यर्थे तु सति जश्त्वस्यासिद्धत्वाद् घत्वं भवति। जश्त्वानुनासिकयोरसिद्धत्वाद् भष् भवति, अनुनासिक-स्यासिद्धत्वाद् जश्त्वं भवति, ततोऽनुनासिके गोधुङ्मान् इति सिध्यति।

गुडलिण्मान्। गुडं लेढि इति लिहेः क्विप्, तदन्तात् गुडलिहोऽस्य सन्तीति मतुपि, पदसंज्ञायां गुडलिह्+मत्, इत्यत्र 'हो ढः' इति ढत्वे कृते 'झयः' इत्यनेन मकारस्य स्थाने वकारः प्रसज्येत। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यादित्यर्थे तु सति जश्त्वस्यासिद्धत्वाद् ढत्वं भवति। अनुनासिकस्यासिद्धत्वाद् जश्त्वं भवति, ततोऽनुनासिके गुडलिण्मान् इति सिध्यति। यरोऽनुनासिकत्वे 'तद्धिते भाषायां नित्यम्' इति णकारः।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

विविक्ष+क्विप्, अतो लोपे, क्विप: सर्वापहारिलोपे, विविक्ष्+सु इत्यत्र सोर्हल्ङ्यादिलोपे 'स्को:०' इति संयोगादे: ककारस्य लोपो न भवति, संयोगादिलोपे कर्तव्ये 'षढो: क: सि' इति कत्वस्यासिद्धत्वात्। तेन संयोगान्तलोपे सति ककारस्य पुन: षकारो भवति, तस्य जश्त्वे – विविट्, विविड् इति रूपम्।

पिपक्ष+क्विप्, अतो लोपे, क्विप: सर्वापहारिलोपे, पिपक्ष्+सु इत्यत्र सोर्हल्ङ्यादिलोपे 'स्को:०' इति संयोगादे: ककारस्य लोपो न भवति, संयोगादिलोपे कर्तव्ये 'षढो: क: सि' इति कत्वस्यासिद्धत्वात्। तेन संयोगान्तलोपे सति ककार: शिष्यते, तस्य चर्त्वे, जश्त्वे – पिपक्, पिपग् इति रूपम्।

आध्यायपरिसमाप्तेरधिकारोऽयम्। अधिक्रियते उपरितनसूत्रजाले शेषत्वेन पठ्यत इत्यधिकार:। यदित ऊर्ध्वनुक्रमिष्याम: पूर्वत्रासिद्धमित्येवं तद् वेदितव्यम्। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यादित्यधिकारे सति 'हो ढ:' इत्यादीनामर्थो भवति – हस्य ढो भवति, इदं च शास्त्रं पूर्वं प्रत्यसिद्धं भवति। अत एव 'न मुने' इत्यादिभि: शास्त्रासिद्धत्वपक्ष उपपद्यते। सिद्धं=निष्पन्नं, प्रवृत्तम्। तद्भिन्नम्=असिद्धमनिष्पन्नम्।

असिद्धत्वं चेह नात्यन्तासत्त्वं विवक्षितम्। किं तर्हि ? पूर्वशास्त्रदृष्ट्याऽविद्यमान-त्वारोपात्मकमेव। एतेन पूर्वत्र कर्तव्ये परशास्त्रबोध्यं कार्यमसिद्धं भवति। तत्कालिकाभाव-प्रतियोगिप्रवृत्तिकर्तृत्ववद् भवतीत्यर्थ:। एतेन त्रैपादिकशास्त्रस्य पूर्वमप्रवृत्तिरेव कल्प्यते। परं शास्त्रं प्रवृत्तमेव न भवतीति यावत्।

यद्यत्र त्रिपादिकार्ये कृते, तस्यासिद्धत्वमिष्येत, तर्हि 'मनोरथ:', इत्यत्र 'रो रि (८.३.१४)' इति त्रिपादिशास्त्रेण रेफस्य लोपे सति, तस्यासिद्धत्वेऽपि 'हशि च (६.१.११२)' इति सपादसप्ताध्यायिशास्त्रेण उत्वं न स्याद्। यथा देवदत्तस्य हन्तरि हतेऽपि देवदत्तस्य पुनरुन्मज्जनं न संभवति।

अमू, अमी। अत्र 'अदस्+औ', 'अदस् जस्' इत्यत्र 'त्यदादीनाम:' इत्यत्वे 'अद अ औ' 'अद अ अस्' इति स्थिते परत्वान्मुत्वे तस्य सपादसप्ताध्यायीस्थकार्यदृष्ट्या-ऽसिद्धत्वेऽपि देवदत्तहन्तृहतन्यायेन तत्स्थान्यकाराभावे पररूपाद्यनापत्ति: स्यात्। एतेन त्रिपादिकार्यमसिद्धं न भवति, त्रिपादिशास्त्रमेवासिद्धं भवति।

एतदसिद्धत्ववचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च भवति।

आदेशलक्षणप्रतिषेधार्थम् – आदेशे सति यल्लक्षणं शास्त्रं प्राप्नोति, तन्न भवत्वित्येतदर्थम्। अस्मा उद्धर। अस्मै+उद्धर – आयादेशे – अस्माय्+उद्धर, इत्यत्र 'लोप: शाकल्यस्य' इति प्राप्तस्य यकारलोपस्यासिद्धत्वात् 'आद् गुण:' इति, प्राप्तो गुणो न भवति।

द्वा अत्र, द्वा आनय, असा आदित्य:। द्वौ+अत्र – आवादेशे, द्वाव्+अत्र, इत्यत्र 'लोप: शाकल्यस्य' इति प्राप्तस्य वकारलोपस्यासिद्धत्वात्, 'अक: सवर्णे दीर्घ:' इति प्राप्तो दीर्घो न भवति।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

उत्सर्गलक्षणभावार्थम् – उत्सर्गः स्थानी। तस्मिन् सति यत्कार्यं प्राप्नोति, तदादेशे सत्यपि प्राप्नोत्वित्येतदर्थम्। अमुष्मै, अमुष्मात्, अमुष्मिन्। अदस्+ङे–'त्यदादीनामः' इत्यत्वे 'अदसोऽसेर्दादु दो मः' इत्युत्वे अमु+ङे इत्यत्र उत्वस्यासिद्धत्वात् अदन्तात्पराणि 'सर्वनाम्नः स्मै', 'ङसिङ्योः स्मात्स्मिनौ' इत्यादीनि भवन्ति।

शुष्किका। 'शुष शोषणे' इत्यस्मात् क्तप्रत्यये 'शुषः कः' (८.२.५१) इति कादेशे 'प्रागिवात् कः' इति के, 'केऽणः' इति ह्रस्वे, टापि शुष्कका इति जाते 'प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः (७.३.४४)' इति नित्यमित्त्वं भवति, न तु 'उदीचामातः स्थाने यकपूर्वायाः' (७.३.४६) इति पाक्षिकम्, 'शुषः कः' इत्येतस्यासिद्धत्वाद्।

शुष्कजङ्घा। 'शुषः कः' इत्येतस्यासिद्धत्वाद् 'न कोपधायाः' (६.३.३७) इति पुंवद्भावप्रतिषेधो न भवति।

क्षामिमान्। क्षैधातोः आत्त्वे, क्तप्रत्यये 'क्षायो मः' (८.२.५३) इति निष्ठातकारस्य मत्वम्। अस्माद् 'अत इनिठनौ' इतीन्, ततो मतुपि क्षामिमान्। अत्र 'क्षायो मः (८.२.५३)' इत्यस्यासिद्धत्वाद् मतुपो मकारस्य 'मादुपधायाश्च०' (८.२.९) इति वत्वं न भवति।

औजढद्। वहेर्निष्ठायामूढः, तमाख्यदिति णिच्, तदन्ताद् लुङ् 'चङि' (६.१.११) इति द्विर्वचने कर्तव्ये ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वाद् णौ च यष्टिलोपस्तस्य स्थानिवद्भावाद् ह्त इत्येतद् द्विरुच्यते। अनग्लोपे (७.४.९३) इति प्रतिषेधात् सन्वदित्वं नास्ति तेनौजढदिति भवति। औजिढदित्येतत् तु क्तिन्नन्तस्य ऊढिशब्दस्य भवति।

यदि हि सपादसप्ताध्याय्यां कर्तव्यायां त्रिपाद्यसिद्धा इत्युच्यते, तदा त्रिपाद्यां ये षष्ठीनिर्देशाः 'संयोगान्तस्य लोप' इत्यादयः, पञ्चमीनिर्देशा 'ह्रस्वादङ्गाद्' इत्यादयः, सप्तमीनिर्देशा 'झलो झलि' इत्यादयश्च सन्ति, तेषां 'षष्ठी स्थानेयोगा' 'तस्मादित्युत्तरस्य' (१.१.६७) 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१.१.६६) इति च कर्तव्ये असिद्धत्वं स्यादिति न। 'कार्यकालं हि संज्ञापरिभाषम्' (परि०) इत्यनेन संज्ञाः परिभाषाश्च कार्यकाला भवन्ति, यत्रैताः प्रयुज्यन्त, स एवासामुपदेशदेशो भवति। अत आसां परिभाषाणां पूर्वत्वं नास्तीति।

किन्तु 'विप्रतिषेधे परं कार्यम्' (१.४.२) इत्येषा परिभाषा त्रिपाद्यां न प्रवर्तते, तस्या यथोद्देशत्वस्यैव बोधनात्। अन्यथा परस्यासिद्धत्वेऽपि विप्रतिषेधसूत्रस्य सिद्धत्वात् परिभाषान्तराणामिवास्या अपि कार्यकालपक्षे तेनाकर्षणापत्तिः स्यात्। यत्र पूर्वं च परं च भवति, तत्रैव कार्यकालपक्षः संभवति।

द्वयोर्हि तुल्यबलयोरेकस्मिन् विषये त्वं चाहं चेति प्रवृत्तिप्रसङ्गो विप्रतिषेधो भवति। इह तु येन पूर्वेण लक्षणेन सह परं लक्षणं स्पर्धते, तत् प्रति तस्यासिद्धत्वादतुल्यबलत्वादयं विप्रतिषेधोऽत्र न सम्भवति। तुल्यबलविरोधो हि विप्रतिषेधः।

यदि 'विप्रतिषेधे परं कार्यम्' (१.४.२) इत्येषा परिभाषा त्रिपाद्यामुपतिष्ठेत, तत्र को

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

दोषः ? 'स्फुर स्फुल सञ्चलने' 'गुरी उद्यमने' आभ्याम् 'ऋहलोर्ण्यत्' इति ण्यति 'पुगन्तलघूपधस्य च (७.३.८६)' इति सपादिशास्त्रेण प्राप्तं गुणं बाधित्वा परत्वाद् 'हलि च' (८.२.७७) इति त्रिपादिशास्त्रेण दीर्घो भवेत्। तेन विस्फोर्यम्, अवगोर्यम् इति न सिध्येत्। अत उच्यते – **पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य।**

यद्येवम्, अपवादोऽपि परः पूर्वमुत्सर्गं न बाधेत ? दुह्+ता इत्यवस्थायां, 'हो ढः (८.२.३१)' इति ढकारः प्राप्नोति, 'दादेर्धातोर्घः (८.२.३२)' इति घकारः प्राप्नोति। 'हो ढः (८.२.३१)' इति पूर्वत्रिपादिशास्त्रं, दादेर्धातोर्घः इति परत्रिपादिशास्त्रम्। त्रिपाद्यां पूर्वं प्रति परं शास्त्रमसिद्धं भवति। सिद्धकार्यं न करोतीत्यर्थः। तर्हि कथमत्र घत्वं भवति ? उच्यते –

यद्यपवादस्यासिद्धत्वादुत्सर्ग एव स्यात्, तर्हि अपवादविधानं व्यर्थं स्यात्। अतोऽपवादस्य परस्यापि उत्सर्गे कर्तव्ये वचनप्रामाण्यादसिद्धत्वं न भवति। तेन दोग्धा, दोग्धुम्, दोग्धव्यमित्यत्र घत्वस्य सिद्धत्वाद् 'हो ढः' (८.२.३१) इति न भवति॥

व्रष्टा, भ्रष्टा, यष्टा, इत्यत्र षत्वस्य सिद्धत्वात् 'चोः कुः' (८.२.३०) इति न भवति॥

'असिद्धं बहिरङ्गमन्तरङ्गे' इत्येषा परिभाषापि त्रिपाद्यां न प्रवर्तते, पूर्वशास्त्रदृष्ट्या परशास्त्रस्याविद्यमानत्वात्।

वृक्णः, वृक्णवान्, इत्यत्र 'ओव्रश्चू छेदने' इत्यस्मात् क्ते, सम्प्रसारणे, 'स्कोः संयोगाद्योरन्ते च (८.२.२९)' इति सकारलोपे वृच्+त इति स्थिते, त्रीणि कार्याणि प्राप्नुवन्ति। 'ओदितश्च (८.२.४५)' इति निष्ठातकारस्य नकारः, 'चोः कुः (८.२.३०)' इति चकारस्य कुत्वं, तदपवादः 'व्रश्चभ्रस्ज० (८.२.३१)' इति चकारस्य षत्वं च। एतेष्वादौ कुत्वस्यापवादभूतं 'व्रश्चभ्रस्ज०' इति चकारस्य षत्वं प्राप्नोति। तद्वारणाय '**निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः**', इति वार्तिकेन षत्वं प्रति निष्ठादेशस्य सिद्धतोच्यते, तेन षत्वं न भवति, कुत्वं च भवति, अन्ते निष्ठातकारस्य नत्वं भवति। तेन वृक्णः, वृक्णवान्, इति सिध्यति।

असिद्धवदत्राभात् ।। २२।।

समानाश्रये आभीये कर्तव्ये आभीयं शास्त्रमसिद्धं भवति।

असिद्धवदित्ययमधिकारः। आ भादित्यभिविधौ आङ्। भस्येत्यधिकारमभिव्याप्येत्यर्थः। भाधिकारश्चापादपरिसमाप्तेरिति सिद्धान्तः। तथा चापादपरिसमाप्तेरधिकारोऽयमिति लभ्यते।

आ भादित्ययमभिविधावाङ् । आभाद्ग्रहणं विषयनिर्देशार्थम्। तेन भाधिकारेऽपि समानाश्रये आभीये कर्तव्ये आभीयं शास्त्रमसिद्धवद्भवति।

यदि 'असिद्धवदत्र' इत्येव सूत्रं स्याद्, आभादिति ग्रहणं न स्यात्, तदा असति हि आभाद्ग्रहणे न ज्ञायते–कस्मिन् कर्तव्ये इदं प्रकरणमसिद्धवद्भवति, कस्मिन् कर्तव्ये असिद्ध–

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

वन्न भवति, तस्मादाभादिति विषयनिर्देशः क्रियते–आ भसंशब्दनाद् यद् यत् कार्यं वक्ष्यते तस्मिन् कर्तव्यतया विषयभूतेऽसिद्धवद्भवतीति। एतेन आभाद्ग्रहणं विषयनिर्देशार्थं फलति।

किमारभ्येत्याकाङ्क्षायामुपस्थितत्वादस्मादेव सूत्रादूर्ध्वमिति लभ्यते। ततश्च 'श्नान्नलोपः (६.४.२३)' इत्यारभ्या पादपरिसमाप्तेर्विहितं यदाभीयं कार्यं, तदसिद्धवद्भवति। प्रवृत्तमप्यप्रवृत्तवद्भवतीत्यर्थः।

अर्थाधिकारोऽयम् । ततश्चेह 'श्नान्नलोपः' इत्यवधिर्निर्णीतः। तेन 'असिद्धवद्' इति शब्दमात्रमुत्तरत्र 'श्नान्नलोपः' इत्यादौ प्रतिसूत्रमुपतिष्ठते। तथा च यद्यत्सूत्रे इदमनुवर्तते तत्तदाभीयकार्ये कर्तव्ये 'असिद्धम्' इति लभ्यते। एवं च 'श्नान्नलोपः' इत्यादि तत्तदाभीयं कार्यं 'श्नान्नलोपः' इत्याद्याभीये कार्ये कर्तव्येऽसिद्धवद् भवतीत्यर्थः पर्यवस्यति।

शब्दाधिकारे तु शब्दार्थयोरुभयोः कल्पना भवति। अतः शब्दाधिकारे यत्र यत्रास्य सूत्रस्योपस्थानं, तत एव आरभ्य यदाभीयं भवति, तस्मिन्नेव कर्तव्येऽसिद्धत्वं स्यान्न तु ततः पूर्वस्मिन्नपि। एतेन 'एधि' इत्यत्र 'घ्वसोरेद्धावभ्यासलोपश्च' इत्येनन यदेत्वं भवति, तदेत्वं 'हुझल्भ्यो हेर्धिः' इति धित्वे कर्तव्ये नासिद्धं भवति, यतो 'हुझल्भ्यो हेर्धिः' इति सूत्रं 'घ्वसोरेद्धावभ्यासलोपश्च' इत्यस्मात् पूर्वमस्ति।

अर्थाधिकारत्वे तु आभीये कर्तव्ये आभीयमसिद्धं भवति, पूर्वं वा, परं वा।

अत्र इत्यनेन निमित्तसप्तम्यन्तेन असिद्धीभवतः कार्यस्य यन्निमित्तं, तन्निमित्तके कार्ये कर्तव्ये सति इत्यर्थलाभात् समानाश्रये आभीये कर्तव्ये आभीयं शास्त्रमसिद्धं भवतीत्यर्थो लभ्यते। एवञ्च 'अनुदात्तोपदेश०' इत्यत्रास्योपस्थाने सत्ययमर्थो भवति – अनुदात्तोपदेशादीनामनुनासिकलोपो भवति झलादौ क्ङिति परे, स चासिद्धो भवति, झलादौ क्ङित्येव निमित्ते सति यदाभीयं प्राप्नोति, तस्मिन् कर्तव्ये, न त्वन्यस्मिन् कर्तव्ये। अतो यस्य कार्यस्यान्यद् निमित्तं भवति, तद् व्याश्रयं कार्यं नासिद्धं भवति।

अस्यातिदेशस्य प्रयोजनद्वयं भवति।

उत्सर्गलक्षणभावार्थम् – उत्सर्गः स्थानी। तस्मिन् सति यत्कार्यं प्राप्नोति, तदादेशे सत्यपि प्राप्नोत्वित्येतदर्थम्। एधि, शाधि। अस्+हि, इत्यत्र 'घ्वसोरेद्धावभ्यासलोपश्च' इत्यनेन सकारस्य एत्वे कृते 'हुझल्भ्यो हेर्धिः' इति झल्लक्षणं धित्वं न प्राप्नोति, तच्च समानाश्रयस्याभीयस्य एत्वादेशस्यासिद्धत्वाद् भवति।

शास्+हि, इत्यत्र 'शा हौ' इत्यनेनशाभावे कृते 'हुझल्भ्यो हेर्धिः' इति झल्लक्षणं धित्वं न प्राप्नोति, तच्च समानाश्रयस्याभीयस्य शादेशस्यासिद्धत्वाद् भवति।

आदेशलक्षणप्रतिषेधार्थम् – आदेशे सति यल्लक्षणं शास्त्रं प्राप्नोति, तन्न भवत्वित्येतदर्थम्। जहि। हन्+हि, इत्यत्र 'हन्तेर्जः' इति जादेशे कृते 'अतो हेः' इति हिलुक् प्राप्नोति। स च समानाश्रयस्याभीयस्य जादेशस्यासिद्धत्वान्न भवति।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

आगहि। जङ्घहि।आगम्+हि, इत्यत्र 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इत्यनुनासिकलोपे कृते 'अतो हे:' (६.४.१०५) इति इति हिलुक् प्राप्नोति, स च समानाश्रयस्याभीयस्य नलोपस्यासिद्धत्वान्न भवति।

अथ च अनाभीये कर्तव्ये समानाश्रयमप्याभीयं शास्त्रं नासिद्धं भवति।

अभाजि।राग:।'भञ्जो आमर्दने' लुङ्, कर्मण्यात्मनेपदम्, 'चिण्भावकर्मणो:' इति च्लेश्चिण् । चिणो लुक् इति तकारलोपे, 'भञ्जेश्च चिणि ' इत्यनुनासिकलोपे अभज्+इ, इत्यवस्थायां 'अत उपधाया:' (७.२.११६) इति समानाश्रयायाम् अनाभाच्छास्त्रीयायां वृद्धौ कर्तव्यायामाभीयोऽनुनासिकलोपोऽसिद्धो न भवति।

राग:। रञ्जेर्घञ्, 'घञि च भावकरणयो:' इत्यनुनासिकलोपे रज्+अ, इत्यवस्थायां 'अत उपधाया:' (७.२.११६) इति समानाश्रयायाम् अनाभाच्छास्त्रीयायां वृद्धौ कर्तव्यायामा-भीयोऽनुनासिकलोपोऽसिद्धो न भवति।

भाधिकारात् प्रागित्युक्ते भूयानित्यत्र 'बहोर्लोपो भू च बहो:' इति बहोर्भूभावस्य ओर्गुणे कर्तव्ये असिद्धत्वं न स्याद्, 'भस्य' इति सूत्रादूर्ध्वभावित्वात्।

अत्रग्रहणं किम् ? अत्रेति समानाश्रयत्वप्रतिपत्यर्थम्। समानाश्रये आभीये कर्तव्य एवेदमसिद्धत्वं भवत्वित्येतदर्थम्। अतश्च समानाश्रये आभीये कर्तव्ये आभीयं शास्त्र-मसिद्धवद्भवति। व्याश्रयं तु नासिद्धवद् भवति।

पपुष: पश्य। पपा+क्वसु+इट्+शस्, इत्यत्र पाधातो: लिट: 'क्वसुश्च' इति क्वसौ 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्यासह्रस्वे, 'वस्वेकाजाद्घसाम्' इतीडागमे, क्वस्वन्ताद् द्वितीया-बहुवचने शसि 'वसो: सम्प्रसारणम्' इत्याभीयम्। तच्च 'आतो लोप इटि च' इत्याल्लोपे कर्तव्ये नासिद्धं भवति, व्याश्रयत्वात्। आल्लोपस्य निमित्तं क्वसु:। संप्रसारणस्य निमित्तं शसिति।

चिच्युष: पश्य। चिचि+क्वसु+शस्, इत्यत्र चिधातो: लिट: 'क्वसुश्च' इति क्वसौ 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्यासह्रस्वे, क्वस्वन्ताद् द्वितीयाबहुवचने शसि 'वसो: सम्प्रसारणम्' इत्याभीयम्। तच्च 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणादेशे कर्तव्ये नासिद्धं भवति, व्याश्रयत्वात्। यणादेशस्य निमित्तं क्वसु:। संप्रसारणस्य निमित्तं शसिति।

लुलुवुष: पश्य। लुलू+क्वसु+शस्, इत्यत्र लूधातो: लिट: 'क्वसुश्च' इति क्वसौ 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्यासह्रस्वे, क्वस्वन्ताद् द्वितीयाबहुवचने शसि 'वसो: सम्प्रसारणम्' इत्याभीयम्। तच्च 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति उवङ्ङादेशे कर्तव्ये नासिद्धं भवति, व्याश्रयत्वात्। उवङ्ङादेशस्य निमित्तं क्वसु:। संप्रसारणस्य निमित्तं शसिति।

नन्वेवमपि नैवात्र आल्लोपादीनि सिध्यन्ति, अन्तरङ्गाणि हि आल्लोपादीनि। विभक्ते: पूर्वो वस्वन्तो भाग:, तदाश्रया लोपादय:। बहिरङ्गं सम्प्रसारणम्, बहिर्भूतविभक्त्याश्रितत्वाद्। प्रकृत्याश्रयमन्तरङ्गं, प्रत्ययाश्रयं बहिरङ्गम्। तत: किम्? 'असिद्धं बहिरङ्गमन्तरङ्गे' इति।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

एतदप्यत्र न भवति। किं कारणम्? यत्रान्तरङ्गबहिरङ्गयोर्युगपदवस्थानं भवति, तत्रैषा परिभाषा प्रवर्तते, अन्तरङ्गे कर्तव्ये बहिरङ्गस्यासिद्धतामापादयितुम्।

इयं हि परिभाषा 'वाह ऊठ्' इत्याभाच्छास्त्रे ज्ञापितत्वादाभाच्छास्त्रीया। अतोऽस्यां कर्तव्यायां 'असिद्धवदत्राभादिति' वसोः संप्रसारणस्य, आल्लोपादीनाञ्चासिद्धत्वादन्तरङ्ग-बहिरङ्गयोर्युगपत् समुपस्थानं नास्तीति 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषा न प्रवर्तते।

॥ **वुग्युटावुवङ्यणोः सिद्धौ भवत इति वक्तव्यम्** ॥ उवङादेशे वुक् सिद्धो भवति –बभूव, बभूवतुः, बभुवुः। यणादेशे युट् सिद्धो भवति –उपदिदीये, उपदिदीयाते, उपदिदीयिरे।

यानि पुनरस्य योगस्य प्रयोजनान्युक्तानि, यानि चोच्यन्ते, सर्वाणि तान्यथासिद्धानि सन्ति। तर्हि किमर्थं सूत्रमारब्धम्? प्रतिपत्तिगौरवपरिहारार्थं सूत्रमिति व्याख्यायते –

पादोऽस्यास्तीति पादिकः। पादशब्दाद् 'अत इनिठनौ' इति ठनि 'यस्येति च' इत्यकारलोपे 'पादः पत्' इति प्राप्नोति, अकारलोपस्यासिद्धत्वान्न भवति। नैतत्प्रयोजनम्। 'अचः परस्मिन्' इति स्थानिवद्भावेन सिध्यति।

उदकं वहति इति औदवाहिः। उदवहस्यापत्यं 'अत इञ्' इति इञि, 'यस्येति च' इत्यकारलोपे 'वाह ऊठ्' इति सम्प्रसारणं प्राप्नोति, अकारलोपस्यासिद्धत्वान्न भवति। नैतत्प्रयोजनम्। 'अचः परस्मिन्' इति स्थानिवद्भावेन सिध्यति।

सारणिः, वारणिः, धारणिः, रावणिः। सारणवारणधारणरावणशब्देभ्यो ल्युडन्तेभ्यः 'अत इञ्' इति इञि, 'यस्येति च' इत्यकारलोपे 'नस्तद्धिते' इति टिलोपः प्राप्नोति, अकार-लोपस्यासिद्धत्वान्न भवति। नैतत्प्रयोजनम्। 'अचः परस्मिन्' इति स्थानिवद्भावेन सिध्यति।

शातनी, पातनी। शातनपातनशब्दाभ्यां 'षिद्गौरादिभ्यः' इति ङीषि, 'यस्येति च' इत्यकारलोपे 'अल्लोपोऽनः' इति अल्लोपः प्राप्नोति, अकारलोपस्यासिद्धत्वान्न भवति। नैतत्प्रयोजनम्। 'अचः परस्मिन्' इति स्थानिवद्भावेन सिध्यति।

स्रंस्यते, ध्वंस्यते। स्रंसेर्ध्वंसेर्ण्यन्ताद्यकि 'णेरनिटि' इति णिलोपे 'अनिदितां हल उपधायाः क्ङिति' इति नलोपः प्राप्नोति, णिलोपस्यासिद्धत्वान्न भवति। नैतत्प्रयोजनम्। 'अचः परस्मिन्' इति स्थानिवद्भावेन सिध्यति।

शाधि। शास्+हि, इत्यत्र 'शा हौ' इत्यनेनशाभावे कृते 'हुझल्भ्यो हेर्धिः' इति झल्लक्षणं धित्वं न प्राप्नोति, तच्च समानाश्रयस्याभीयस्य शादेशस्यासिद्धत्वाद् भवति। नैतत्प्रयोजनम्। शास्+हि, 'शा हौ' इत्यत्र शासः स्थाने शासित्यादेशो विधीयते। अत्र सकारस्य रुत्वे, यत्वे, लोपे 'शा हौ' इति सूत्रं भवति। तर्हि शासः स्थाने शासादेशे किं प्रयोजनम्? 'शास इदङ्हलोः' इति इत्वबाधनार्थं सूत्रमारब्धम्।

एधि। अस्+हि, इत्यत्र 'श्नसोरल्लोपः' इति अकारस्य लोपे, 'घ्वसोरेद्धावभ्यासलोपश्च'

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

इत्यनेन सकारस्य एत्वे कृते 'हुझल्भ्यो हेर्धिः' इति झल्लक्षणं धित्वं न प्राप्नोति, तच्च समानाश्रयस्याभीयस्य एत्वादेशस्यासिद्धत्वाद् भवति। एतदपि नास्ति प्रयोजनम्।'श्नसोरल्लोप' इति तपरकरणस्य वैयर्थ्यादाभीयासिद्धत्वमनित्यमिति ज्ञापनेन 'एधि' इति सिध्यति।

जहि। हन्+हि, इत्यत्र 'हन्तेर्जः' इति जादेशे कृते 'अतो हेः' इति हिलुक् प्राप्नोति। स च समानाश्रयस्याभीयस्य जादेशस्यासिद्धत्वान्न भवति। एतदपि नास्ति प्रयोजनम्। 'अतो हेः' इत्यत्र 'उतश्च प्रत्ययात्०' इत्यतः प्रत्ययग्रहणापकर्षणात् 'जहि' इत्यत्र हन्तेर्जभावे प्रत्ययात्परत्वाभावाद् हेर्लुक् न भवति।

आगहि। जङ्घहि। आगम्+हि, इत्यत्र 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक-लोपो झलि क्ङिति' इत्यनुनासिकलोपे कृते 'अतो हेः' इति इति हिलुक् प्राप्नोति, स च समानाश्रयस्याभीयस्य नलोपस्यासिद्धत्वान्न भवति। नैतत्प्रयोजनम्। अत्रापि प्रत्ययात्परत्वाभावाद् हेर्लुक् न भवति।

गतः, गतवान्। गम्+क्त, इत्यत्र 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इत्यनुनासिकलोपे कृते 'अतो लोपः' इति अतो लोपः प्राप्नोति, स च समाना-श्रयस्याभीयस्य नलोपस्यासिद्धत्वान्न भवति। नैतत्प्रयोजनम्। 'अतो लोपः' इत्यत्र 'अनुदात्तोपदेश०' इति सूत्राद् 'उपदेशे' इति अनुवर्तते। तेन आर्धधातुकोपदेशकाले यदकारान्तमङ्गं, तस्य लोपो भवति आर्धधातुके प्रत्यये परतः, इति सूत्रार्थो भवति।

इहापि तर्हि अल्लोपो न स्यात् – धिन+उ+तः=धिनुतः। कृण+उ+तः=कृणुतः। नेमौ उपदेशे अदन्तौ। 'धिन्विकृण्व्योर च' इत्यनेनादन्तौ। नोपदेशग्रहणेनाङ्गमभिसम्बध्यते। किं तर्हि ? आर्धधातुकमभिसम्बध्यते। धिनुतः, कृणुतः, इत्यत्र उप्रत्ययसंनियोगेनैव अदन्तत्वं विधीयते। अत इमावपि आर्धधातुकोपदेशकाले अदन्तौ।

कुरु। कृ+उ+हि=कुरु, इत्यत्र हिलुक् च प्राप्नोति, गुणश्च। परत्वाद् गुणे कृते 'अत उत्सार्वधातुके' इति उत्वं च प्राप्नोति, हिलुक् च। नित्यत्वाद् हिलुग्भवति। ततः सार्वधातुकस्याभावाद् उत्वं न प्राप्नोति, असिद्धत्वाद्भवति। नैतत्प्रयोजनम्। उप्रत्ययान्तकरोतेः सार्वधातुकपरत्वाव्यभिचाराद् भूतपूर्वेऽपि सार्वधातुके भवति उत्वम्।

अकारि, ऐक्षि। अत्र नित्यत्वात् 'चिणो लुक्' इति लुकि कृते लुङि इत्यडाटौ न प्राप्नुतः। असिद्धत्वाद् भवतः। एतदपि नास्ति प्रयोजनम्। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यत्र उपदेश इत्यनुवृत्तेः, लुङादिषु लकारेषु इति द्विलकारनिर्देशाश्रयणाद् वा, लुङादिषु लावस्थामेव अडाटौ भवतः।

आसन्। अत्र 'श्नसोरल्लोपः' इति अकारस्य लोपे, अनजादित्वात् आट् न प्राप्नोति, अल्लोपस्यासद्धत्वाद्भवति। एतदपि नास्ति प्रयोजनम्। प्रागेव श्नसोरल्लोपादाटि कृते तपरकरणा-दल्लोपाभावः।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

आयन्। अत्र 'इणो यण्' इति इकारस्य स्थाने यणादेशे, अनजादित्वात् आट् न प्राप्नोति, यणादेशस्यासिद्धत्वाद्भवति। एतदपि नास्ति प्रयोजनम्। प्रागेव यणादेशादाटि कृते सिध्यति।

यद्येवम्, ऐज्यत, औप्यत, इत्यत्र लङो लावस्थायां सम्प्रसारणाभावाद् यजिवप्यो-रनजादित्वादटि सति 'आटश्च' इति वृद्धिर्न स्यादिति न। अत्र 'आटश्च' इति सूत्रं 'अटश्च' इति क्रियते। 'अचि' इत्यधिकाराच्च अचि वृद्धिर्भवति, हलि वृद्धिर्न भवति। सम्प्रसारणे सत्यजादित्वाद् भवति।

भूयान्। बहु+ईयसुन्, इत्यत्र 'बहोर्लोपो भू च बहोः' इत्यनेन बहोः भूभावे कृते 'ओर्गुणः' इति गुणः प्राप्नोति, असिद्धत्वान्न भवति। एतदपि नास्ति प्रयोजनम्। भू इत्यस्य दीर्घोच्चारणसामर्थ्यान्न भवति।

मघोनः।मघवन्+शस्, 'श्वयुवमघोनामतद्धिते' इति सम्प्रसारणे कृते 'मघ+उन्+अस्' इत्यत्र पूर्वस्य भसंज्ञायां 'यस्येति च' इत्यकारलोपः प्राप्नोति। सम्प्रसारणस्यासिद्धत्वान्न भवति। एतदपि नास्ति प्रयोजनम्। मघवन्शब्दोऽव्युत्पन्नं प्रातिपदिकम्। अतो वन् इति प्रत्यय एव नास्ति। तेन तद्धिते विधीयमानो 'यस्येति च' इत्यकारलोपो न भवति। व्याश्रयत्वादसिद्धत्वमपि न भवति। यतः शसि सम्प्रसारणम्, सम्प्रसारणे च यस्येति लोप इत्यव्युत्पत्तिपक्ष एवाश्रयणीयः।

किंस्विद् गर्भं प्रथमं दध्र आपः। दधा+इरे, इत्यत्र 'इरयो रे' इति इति रेभावे कृते 'आतो लोप इटि च' इति आलोपो न प्राप्नोति, रेभावस्य असिद्धत्वाद्भवति। एतदपि नास्ति प्रयोजनम्। रेभावश्छान्दसः। लिट् च छन्दसि सार्वधातुकमपि भवति। तत्र 'सार्वधातुमपित्' इति ङित्त्वे 'श्नाभ्यस्तयोरातः' इति आलोपो भवति।

कुर्वः, कुर्मः, कुर्याम्। कृ+उ+वस्, कृ+उ+मस्, कृ+उ+यात्, इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति ऋकारस्य गुणश्च प्राप्नोति, 'नित्यं करोतेः' 'ये च' इति उकारलोपश्च प्राप्नोति। तत्रोभयोर्नित्ययोः परत्वाद् गुणे कृते कर्+उ+वस्, कर्+उ+मस्, कर्+उ+यात्, इत्यत्र उकारलोपश्च प्राप्नोति, 'अत उत्सार्वधातुके' इति अकारस्य उत्वं च प्राप्नोति। नित्यत्वादुकारलोपे कृते 'अत उत्सार्वधातुके' इति सार्वधातुकपरे उप्रत्यये विधीयमानम् अकारस्य उत्वं न प्राप्नोति। उलोपस्यासिद्धत्वाद् भवति। एतदपि नास्ति प्रयोजनम्। सत्यप्युकारलोपे तस्य स्थानिवद्भावात्प्रत्ययलक्षणेन वा 'अत उत्सार्वधातुके' इत्यत्र म्वोर्य इत्यनुवृत्तेर्वा उत्वं भविष्यति।

कारिष्यते। णिजन्तात् कृधातोः कर्मणि लृटि 'कारि+स्य+ते' इत्यत्र 'स्यसिच्-सीयुट्तासिषु भावकर्मणो.पदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' चिण्वद्भावो भवति, इट् च। अस्मिंस्तु इटि कृते वलादिलक्षण इट् न प्राप्नोति। तेन इडागमे 'कारि+इट्+स्य+ते' इति स्थिते सेट्त्वात् 'णेरनिटि' इति णेर्लोपो न प्राप्नोति, चिण्वदिटोऽसिद्धत्वात् भवति। एतदपि नास्ति प्रयोजनम्।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

स्यसिच्तासिषु० इति सूत्रे चकारः पठितः। स च समुच्च्ये। अतश्चिण्वदिट् भवति, अन्यच्च भवति। किमन्यत् ? णिलोपः। अवश्यं चकारेण णिलोपः समुच्चेतव्यः। अन्यथा चिण्वदिटोऽसिद्धत्वेऽपि वलादिलक्षणेनेटा सेड्बुद्धिरेव णिलोपशास्त्रास्यस्मिन् विषये वर्तते, इति णिलोपो न स्यात्।

अकारितराम्। अकारि+त+तराम्, इत्यत्र ‘चिणो लुक्’ इत्यनेन चिणः परस्य तप्रत्ययस्य लुकि सति, अकारि+तराम् इत्यत्र ‘चिणो लुक्’ इत्यनेन तरप्-प्रत्ययस्यापि लुक् प्राप्नोति। स च तप्रत्ययस्य लुक् ‘चिणो लुक्’ इत्यस्य कर्तव्यतायामसिद्धो भवति। एतदपि नास्ति प्रयोजनम्। ‘चिणो लुक्’ इत्यत्र ‘गमहनजनखनघसां लोपः क्ङित्यनङि’ इतः क्ङिति इत्यनुवर्तते। तरप् इति नास्ति ङित्। अतो न भवत्यस्य लुक्।

शुनः। ‘श्वन्नुक्षन्०’ इत्यादिना कनिप्रत्ययान्तः श्वन्शब्दः प्रत्ययस्वरेणान्तोदात्तः। तस्माद्वितीया बहुवचने ‘श्वन्+अस्’, इत्यत्र ‘श्वयुवमघोनामतद्धिते’ इति सम्प्रसारणे ‘शु+अन्+अस्इति स्थिते ‘वार्णादाङ्गं बलीयः’ इत्याङ्गस्य बलीयस्त्वात् ‘सम्प्रसारणाच्च’ इति पूर्वरूपं बाधित्वा ‘अल्लोनोऽनः’ इत्यकारलोपः प्राप्नोति। तेन ‘अनुदात्तस्य च यत्रोदात्तलोपः’ इति विभक्तेरुदात्तनिवृत्तिस्वरः प्राप्नोति। सम्प्रसारणस्यासिद्धत्वान्न भवति। सम्प्रसारणस्यासिद्धत्वे ‘न संयोगाद्वमन्तात्’ इत्यल्लोपस्य प्रतिषेधे सति सम्प्रसारणस्य पूर्वरूपत्वे, ‘एकादेश उदात्तेनोदात्तः’ इत्याद्युदात्तं पदं भवति।

अत्रोच्यते – नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति। किं कारणम् ? ‘न गोश्वन्सावर्वर्ण०’ इति प्रतिषेधात्। नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः। कस्य तर्हि ? तृतीयादिस्वरस्य। स च श्वभ्याम्, श्वभिरिति हलादौ विभक्तावुदात्तलोपाभावे चरितार्थः। एवं तर्हि न लक्षणप्रतिषेधं शिष्मः। किं तर्हि ? येन केनचित्प्राप्तस्य तृतीयादिस्वरस्य। यत्र तर्हि तृतीयादिस्वरो नास्ति – शुनः पश्य इति, तत्रोदात्तनिवृत्तिस्वरः प्राप्नोति? एवं तर्हि तृतीयादिग्रहणमपि निवर्तिष्यते, अविशेषेण विभक्तिस्वरमात्रस्य प्रतिषेधः। ज्ञापकाद्वा सिद्धम्, यदयं श्वन्शब्दं गौरादिषु पठति। तज्ज्ञापयत्याचार्यः – नोदात्तनिवृत्तिस्वरः, शुन्यवतरतीति। अन्तोदात्तार्थं यत्नं करोति। सिद्धं हि स्यात् ङीपैव।

एवमप्यत्र वर्तते विशेषः। अल्लोपेन वा निवृत्तौ सत्यां पूर्वत्वेन वा अल्लोपे सति, बहवः श्वानो यस्यामित्यत्र बहुव्रीहेरुपधालोपित्वात् ‘अन उपधालोपिनोऽन्यतरस्याम्’ इति ङीपा भाव्यम् – बहुशुनी इति, तदभावे तु बहुश्वा इति भवति। गौरादिङीषोऽप्यनुपसर्जनाधिकारादत्राप्रसङ्गः।

किञ्च ज्ञापकसामान्येन वा निषेधादुदात्तनिवृत्तिस्वराभावेऽपि कथमाद्युदात्तं पदं भवति, न ह्यल्लोपे सत्येकादेशस्वरोऽस्ति, ततश्च सर्वानुदात्तं पदं स्यात्, तदेतद्भवति प्रयोजनम्? न प्रयोजनम्। अन्तरङ्गत्वात् पूर्वत्वं भवति। न च वार्णादाङ्गस्य बलीयस्त्वम्, व्याश्रयत्वात्। अल्लोपस्य निमित्तं विभक्तिः, पूर्वत्वस्य निमित्तं श्वन्शब्दाकारः।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

इत्थञ्चास्य सूत्रस्य सर्वाण्यपि प्रयोजनान्यथासिद्धानि, तर्हि किमर्थं सूत्रमिद-मारब्धमित्युच्यते - सूत्राभावे एषां प्रयोगाणां प्रतिपत्तौ महद्गौरवं स्यात्, तस्य प्रतिपत्तिगौरवस्य परिहारार्थं सूत्रमिदमारब्धमिति।

अन्तादिवच्च (पा. सू. ६.१.८४)

एक इति वर्तते, पूर्वपरयोरिति च। एकः पूर्वपरयोरिति योऽयमेकादेशो विधीयते, स पूर्वस्यान्तवद् भवति, परस्यादिवद् भवति। यथा तस्यान्त आदिर्वा तदन्तर्भूतस्तद्ग्रहणेन गृह्यते, तद्वदेकादेशोऽपि तद्ग्रहणेन गृह्यत इत्येषोऽतिदेशार्थः।

ब्रह्मबन्धूः। ब्रह्मबन्धु+ऊङ्, इत्यत्र 'अकः सवर्णे दीर्घः' इति दीर्घैकादेशः। तत्र ब्रह्मबन्धु इति प्रातिपदिकम्, ऊङित्यप्रातिपदिकम्, तयोः प्रातिपदिकाप्रातिपदिकयोर्य एकादेशः स पूर्वान्तवत्त्वेन प्रातिपदिकस्यान्तवद् भवति। तेन 'ङ्याप्प्रातिपदिकात्' (४.१.१) इति स्वादिविधिः कर्तुं शक्यते।

वृक्षौ। वृक्ष+औ, इत्यत्र 'वृद्धिरेचि' इति वृद्ध्येकादेशः। तत्र औकारः सुप्, अकारः असुप्, तयोः सुबसुपोरेकादेशः परादिवत्त्वेन सुप आदिवद् भवति। तेन सुप्तिङन्तं पदम् (१.४.१४) इति पदसंज्ञा भवति।

पचे, यजे। पच+ए, इत्यत्र 'अतो गुणे' इति पररूपमेकादेशः। तत्र अकारः अतिङ्, एकारः तिङ्, तयोः तिङतिङोरेकादेशः परादिवत्त्वेन तिङआदिवद् भवति। तेन सुप्तिङन्तं पदम् (१.४.१४) इति पदसंज्ञा भवति।

क्षीरपेण। क्षीरप+इन, इत्यत्र 'आद्गुणः' इति गुणैकादेशः। तत्र पूर्वान्तवत्त्वेन 'पे' इत्युत्तरपदस्य एकाच्त्वाद् 'एकाजुत्तरपदे णः' इति णत्वं भवति।

अत्र एकादेशे स्थानिवत्सूत्रं न प्रवर्तते, पकारादकारमालम्ब्य 'पे' इत्यस्य एकाजुत्तरपदाश्रयेण प्रवर्तमानस्य णत्वस्य स्थान्यलाश्रयत्वात्।

खट्वा। खट्व+आ, इत्यत्र 'अकः सवर्णे दीर्घः' इति दीर्घैकादेशः। तस्य परादि-वत्त्वेन टाप्त्वात् ततः परस्य सोर्हल्ङ्यादिलोपो भवति। इदमपि स्थानिवत्त्वेनानिर्वाह्यम्, हल्ङ्यादिलोपस्य स्थान्यलाश्रयत्वात्।

वर्णाश्रयविधावयमन्तादिवद्भावो नेष्यते। अत्र पूर्वपरसमुदाय एकादेशस्य स्थानी, स हि तेन निवर्त्यते। तत्रावयवयोरानुमानिकं स्थानित्वमिति तदाश्रयं कार्यं स्थानिवद्भावादप्राप्तमित्यन्तादिवद्भावो विधीयते। तथाहि -

यजेर्लङि उत्तमपुरुषैकवचने इटि शपि आद्गुणे - अयज+इ=अयजे इन्द्रम् इत्यत्र गुणैकादेशस्य परादिवत्त्वेन इकारत्वात् तत्र इकारे परे सवर्णदीर्घो न भवति, यतोऽत्र अल्समुदायधर्माः प्रातिपदिकत्वप्रत्ययत्वसुबन्तत्वादय एवातिदिश्यन्ते, न तु वर्णमात्रधर्मा अत्व-इत्व-ह्रस्वत्वादयः।

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.

खट्वाभिः। खट्व+आ=खट्वा, इत्यत्र सवर्णदीर्घैकादेशस्य पूर्वान्तवद्भावाभावाद् 'अतो भिस ऐस्' (७.१.९) इति भिसादेशो न भवति, यतः 'अतो भिस ऐस्' इति हि अकारवर्णाश्रयो विधिः।

जुहाव। अत्र 'अभ्यस्तस्य च' इति ह्वयतेः सम्प्रसारणे कृते यत् 'संप्रसारणाच्च' इति आकारस्य पूर्वरूपं भवति, तस्य परादिवद्भावाभावाद् 'आत औ णलः' (७.१.३४) इति न भवति, यत 'आत औ णलः' इति हि आकारवर्णाश्रयो विधिः।

अस्यै अश्वः। इदम्+ङे इत्यत्रअत्वपररूपटाप्सु स्याडागमे ह्रस्वत्वे इदो लोपे – अस्या+ए इत्यत्र 'वृद्धिरेचि' (६.१.८८) इति वृद्धिरेकादेशो भवति, स च, 'एङः पदान्तादति' (६.१.१०९) इत्यत्र विधावादिवद् न भवति। तदभावादायादेशे 'लोपः शाकल्यस्य' इति वा यकारलोपे – अस्या अश्वः, अस्यायश्वः इति।

तत् किमेतद् वक्तव्यम्, वर्णाश्रयविधौ नान्तादिवदिति। न वक्तव्यम्। कथम् ? अताद्रूप्यातिदेशात्। नेह ताद्रूप्यमतिदिश्यते। रूपाश्रयाश्चैते विधयः। तेनउक्तं च भाष्ये – न वा अताद्रूप्यातिदेशाद् इति। अन्तादिवर्णमात्रवृत्तिधर्मानतिदेशाद् 'अयजे इन्द्रम्' इत्येवंजातीयकेषु सवर्णदीर्घादिकं न भवति।

उभयत आश्रयणे नान्तादिवत्–यत्र न्तश्चादिश्चोभयं युगपदाश्रीयते, तत्राप्यन्तादिवद्भावो न भवति। यथा – अभि+ईयात्=अभीयात्। परि+ईयात्=परीयात्। अत्र 'एतेर्लिङि' इति उपसर्गात् परस्य इणो ह्रस्वत्वं विधीयमानं न भवति। यदि ह्ययमेकादेशः बुद्ध्या पूर्वं प्रत्यन्तवद् गृह्येत, स तदानीमेव कथं परं प्रत्यादिवत् स्यात् ? यदि परं प्रत्यादिवत् गृह्येत, स तदानीमेव कथं पूर्वं प्रत्यन्तवद् स्यात् ? एकस्योभयापेक्षया युगपत्पारतन्त्र्यस्य विरोधात्। अतोऽत्रोभयं न भवति।

षत्वतुकोरसिद्धः (पा. सू. ६.१.८५)

षत्वे तुकि च कर्तव्य एकादेशोऽसिद्धो भवति, सिद्धकार्यं न करोतीत्यर्थः। सिद्धस्य निष्पन्नस्य एकादेशस्य यत्कार्यं, तदेकादेशः सिद्धो निष्पन्नोऽपि न करोतीत्यर्थः।

असिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च। आदेशे सति यत्प्राप्नोति, तस्य प्रतिषेधार्थम्। उत्सर्गः स्थानी, तस्मिन् स्थानिनि सति यन्न प्राप्नोति, तस्य प्रापणार्थमित्यर्थः।

आदेशलक्षणप्रतिषेधार्थम्–कस्+असिचद्, इत्यत्र सकारस्य रुत्वे, उत्वे, गुणे, 'एङः पदान्तादति' (६.१.१०९) इति पूर्वरूपे 'कोऽसिचद्' इत्यत्र पूर्वरूपैकादेशस्य परादिवद्भावादपदादेरिण उत्तरस्यादेशसकारस्य षत्वं प्राप्नोति, तदेकादेशस्यासिद्धत्वाद् न भवति। असिद्धत्वे हि सति सकारोऽत्र पदादिर्भवति, तेन 'सात्पदाद्योः' इति षत्वप्रतिषेधो भवति। एवं कोऽस्य योऽस्य कोऽस्मै योऽस्मै इत्यत्रापि पूर्वरूपैकादेशस्य परं प्रत्यादिवद्भावादपदादेरिण उत्तरस्य प्रत्ययसकारस्य षत्वं प्राप्नोति, तदेकादेशस्यासिद्धत्वाद् न भवति।

TRIAL MODE – a valid license will remove this message. See the keywords property of this PDF for more information.

उत्सर्गलक्षणभावार्थम्–अधि+इ+क्त्वा=अधीत्य, प्र+इ+क्त्वा=प्रेत्य, इत्यत्र समासे, क्त्वो ल्यपि, दीर्घैकादेशे, 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१) इति तुग् न प्राप्नोति, स चैकादेशस्यासिद्धत्वाद् भवति॥

ननु च बहिरङ्ग एकादेशो द्विपदाश्रयत्वात्, अन्तरङ्गौ षत्वतुकौ एकपदाश्रयत्वात्, तत्र 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यनया परिभाषयैवात्रैकादेशस्यासिद्धत्वे तुग्भविष्यतीति निरर्थकमिदं वचनम्? एवं तर्हि सैव परिभाषात्र प्रकरणे षत्वतुग्भ्यां नियम्यते। तेन अक्षद्यूरित्यत्र बहिरङ्गलक्षणोऽप्यूडादेशोऽन्तरङ्गयणादेशे कर्तव्ये नासिद्धो भवति।

॥ संप्रसारणङीट्सु प्रतिषेधो वक्तव्यः॥ सम्प्रसारणे ङौ इटि च य एकादेश-स्तस्यासिद्धत्वप्रतिषेधो वक्तव्यः।

संप्रसारणे–ब्रह्महूषु। परिवीषु। ब्रह्माणं ह्वयतीति क्विप्, यजादित्वात् सम्प्रसारणं, 'सम्प्रसारणाच्च' इति पूर्वरूपम्, 'हलः' इति दीर्घः। अत्र संप्रसारणपूर्वत्वस्यासिद्धत्वात् षत्वं न प्राप्नोतीत्यसिद्धत्वस्य निषेधः क्रियते।

ङौ – वृक्षेच्छत्रम्, वृक्षे छत्रम्।

इटि–अपचेच्छत्रम्, अपचे छत्रम्। आद्गुणस्यासिद्धत्वाद् ह्रस्वलक्षणो (६.१.७६) नित्योऽत्र तुक् प्राप्नोति, 'दीर्घात्' (६.१.७५) 'पदान्ताद् वा' (६.१.७६) इति तुग्विकल्प इष्यते॥

******

TRIAL MODE − a valid license will remove this message. See the keywords property of this PDF for more information.